अथ यजुर्वेदीयं

मैत्रायणीयमारण्यकम् ।

शान्तिः ।[1]

ॐ तच्छं॰ योरा वृणीमहे गातुं यज्ञाय गातुं यज्ञपतये ।
दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः ॥
ऊर्ध्वं जिगातु भेषजं॰ शं नो अस्तु द्विपदे शं चतुष्पदे ॥ १ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि, सर्वं ब्रह्मोपनिषदं, माऽहं ब्रह्म निराकुर्यां, मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मे ऽ अस्तु॥ तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु, ते मयि सन्तु ॥ १ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

वैराग्योत्थभक्तियुक्तब्रह्ममात्रप्रबोधतः । यत्पदं मुनयो यान्ति तत् त्रैपदमहं महः ॥ १ ॥

अथ प्रथमः प्रपाठकः ।

॥ ॐ ॥ ब्रह्मयज्ञो[2] वा ऽ एष यत्पूर्वेषां चयनन्तस्माद्यजमानश्चित्वैतानग्नीनात्मानमभिध्यायेत्, सम्पूर्णः खलु वा ऽ अद्धाऽविकलः सम्पद्यते यज्ञः कः सोऽभिध्येय३ योऽयं॰ यः प्राणाख्यस्तस्योपाख्यानम् ॥१॥

(१) ब्रह्मयज्ञः वै एषः, यत् पूर्वेषां चयनं, तस्मात् यजमानः चित्वा एतान् अग्नीन्, आत्मानं अभिध्यायेत् ।	संपूर्णः खलु वै अद्धा अविकलः संपद्यते यज्ञः । कः सः अभिध्येयः ? अयं यः प्राणाख्यः । तस्य उपाख्यानम् ॥१॥

१ क्वचिदेषा शान्तिरपि दृश्यते ।

२ एषा कण्डिका निर्णयसागर-मुंबई-मुद्रिताष्टोत्तरशतोपनिषदन्तर्गतमैत्रायणीयोपनिषदि नास्त्येवेति ।

३ निर्णयसागर-मुंबई-मुद्रिताष्टोत्तरशतोपनिषदन्तर्गतमैत्रायणीयोपनिषदः प्रारम्भ इमां कण्डिकामारभ्यैवेति ।

४ एतस्या मैत्रायणीयोपनिषदः संस्करणे मुम्बईस्थनिर्णयसागरमुद्रितमेकं पुस्तकमपरं श्रीमत्परमहंसपरिव्राजककृष्णानन्दयतिवर्यैः [श्री॰ मुठे स्वामिभिः] दत्तं लिखितपुस्तकं चेति पुस्तकद्वयमेव हस्ते समापन्नम्। तयोरुभयोर्मेलने क्रियमाणेऽन्योऽन्यं महद्वैषम्यं दृक्पथे समागतम् । तत्र मुद्रितपुस्तकमतीवपाठभेदसमाकुलमानुपूर्व्या परिभ्रष्टं न्यूनमसम्पूर्णं स्वराङ्कनविरहितं प्रपाठकपञ्चकात्मकमेवेति, तत्त्यक्त्वा लिखितपुस्तकं विशुद्धपाठवद्यथावदानुपूर्वीकं सम्पूर्णं स्वरलेखनसन्नियमितं प्रपाठकसप्तकोपेतं मैत्रायणीयवैदिकवर्याणां नित्यपाठाधारामिति कृत्वा तदेवावलम्ब्यैतत्संस्करणं संस्कृतमिति ज्ञेयम् ॥

मुद्रितपुस्तकस्थाः पाठभेदास्तु पदेपदे वर्तमानाः क्वचिदपपाठाः क्वचिच्च शुद्धाः पाठाः सन्ति, तथापि ते नार्थान्तरमावहन्त्यतो न सङ्ग्रहीता इत्यपि ज्ञेयम् ॥

बृहद्रथो वै नाम राजा विराज्ये पुत्रं निधापयित्वेदमशाश्वतम्मन्यमानः शरीरं वैराग्यमुपेतोऽरण्यं निर्जगाम, स तत्र परमन्तप ऽ आस्थायाऽऽदित्यमुदीक्षमाण ऽ ऊर्ध्वबाहुस्तिष्ठत्यन्ते सहस्रस्य अन्तिकमाजगाम, अग्निरिवाधूमकस्तेजसा निर्दहन्निवात्मविद्भगवाञ्छाकायन्य ऽ उत्तिष्ठोत्तिष्ठ, वरं वृणीष्वेति राजानमब्रवीत्, स तस्मै नमस्कृत्वोवाच, भगवन्नाहमात्मवित्त्वं तत्त्वविच्छुश्रुमो वयं स त्वं नो ब्रूहीति, एतद्वृत्तं पुरस्ताद्दुःशक्यमेतम्प्रश्नमैक्ष्वाकान्यान्कामान्वृणीष्वेति शाकायन्यः, शिरसाऽस्य चरणावभिमृश्यमानो राजेमां गाथां जगाद ॥२॥

भगवन्नास्थिचर्मस्नायुमज्जामांसशुक्रशोणितश्लेष्माश्रुदूषिकाविण्मूत्रपित्तकफसङ्घाते दुर्गन्धे निःसारेऽस्मिञ्छरीरे किङ्कामोपभोगैः, कामक्रोधलोभमोहभयविषादेर्ष्येष्टवियोगानिष्टसम्प्रयोगक्षुत्पिपासाजरामृत्युरोगशोकाद्यैरभिहतेऽस्मिञ्छरीरे किङ्कामोपभोगैः ॥३॥

सर्वञ्चेदं क्षयिष्णु पश्यामो यथेमे दंशमशकादयः॥ तृणवनस्पतय उद्भूतप्रध्वंसिनोऽथ किमेतैर्वाऽपरेऽन्ये महाधनुर्द्धराश्चक्रवर्तिनः ॥ केचित्सुद्युम्नभूरिद्युम्नेन्द्रद्युम्नकुवलयाश्वयौवनाश्ववध्र्यश्वाश्वपतिः शशबिन्दुर्हरिश्चन्द्रोऽम्बरीषो ननक्तुः शर्यातिर्ययातिरनरण्योऽक्षसेना-

---

(२) बृहद्रथः वै नाम राजा, विराज्ये पुत्रं निधापयित्वा, 'इदं अशाश्वतं' मन्यमानः शरीरं, वैराग्यं उपेतः, अरण्यं निर्जगाम।

सः तत्र परमं तपः आस्थाय, आदित्यं उदीक्षमाणः, ऊर्ध्वबाहुः तिष्ठति।

अन्ते सहस्रस्य, अन्तिकं आजगाम, अग्निः इव अधूमकः, तेजसा निर्दहन् इव, आत्मवित्, भगवान् शाकायन्यः।

'उत्तिष्ठ, उत्तिष्ठ, वरं वृणीष्व' इति राजानं अब्रवीत्।

स तस्मै नमस्कृत्वा उवाच—

'भगवन्! न अहं आत्मवित्, त्वं तत्त्ववित्, शुश्रुमः वयं, स त्वं नो ब्रूहि' इति।

'एतत् वृत्तं पुरस्तात्, दुःशक्यं एतं प्रश्नं, ऐक्ष्वाक! अन्यान् कामान् वृणीष्व' इति शाकायन्यः।

शिरसा अस्य चरणौ अभिमृश्यमानः राजा इमां गाथां जगाद ॥२॥—

(३) भगवन्! अस्थि–चर्म–स्नायु–मज्जा–मांस–शुक्र–शोणित–श्लेष्मा–अश्रु–दूषिका–विट्–मूत्र–पित्त–कफ–संघाते दुर्गन्धे निःसारे अस्मिन् शरीरे किं काम–उपभोगैः? काम–क्रोध–लोभ–मोह–भय–विषाद–ईर्ष्या–इष्टवियोग–अनिष्टसंप्रयोग–क्षुत्–पिपासा–जरा–मृत्यु–रोग–शोक–आद्यैः अभिहते अस्मिन् शरीरे किं काम–उपभोगैः? ॥३॥

(४) 'सर्वं च इदं क्षयिष्णु पश्यामः, यथा इमे दंश–मशक–आदयः, तृण–वनस्पतयः उद्भूत–प्रध्वंसिनः। अथ किं एतैः वा? परे अन्ये महा–धनुर्धराः चक्रवर्तिनः। केचित् सुद्युम्न–भूरिद्युम्न–इन्द्रद्युम्न–कुवलयाश्व–यौवनाश्व–वध्र्यश्व च अश्वपतिः, शशबिन्दुः, हरिश्चन्द्रः, अम्बरीषः, ननक्तुः, शर्यातिः, ययातिः, अनरण्यः, अक्षसेन–आदयः।

वृयोऽथ मरुत्तभरतप्रभृतयो राजानो मिषतो बन्धुवर्गस्य महतीꣳश्रियं त्यक्त्वाऽस्माल्लोकादमुंल्लोकं प्रयाता इति,अथ किमेतैर्वाऽपरेऽन्ये गन्धर्वासुरयक्षराक्षसभूतगणपिशाचोरगग्रहादीनां निरोधनं पश्यामः, अथ किमेतैर्वार्ण्यानाꣳ शोषणं महार्णवानाꣳ, शिखरिणां प्रपतनं, ध्रुवस्य प्रचलनꣳ,व्रश्चनꣳ वातरज्जूनां, निमज्जनं पृथिव्याः, स्थानादपसरणꣳ सुराणामित्येतद्विधेऽस्मिन्सꣳसारे, किङ्कामोपभोगैर्यैरेवाशितस्यासकृदिहावर्तनं दृश्यता ऽ इत्युद्धर्तुमर्हसीत्यन्धोदपानस्थो भेक ऽ इवाहमस्मिन्सꣳसारे भगवꣳस्त्वं नो गतिस्त्वं नो गतिः ॥४॥

॥ इति मैत्रायणीयारण्यके प्रथमः प्रपाठकः ॥१॥

॥ अथ द्वितीयः प्रपाठकः ॥

॥ ॐ ॥ अथ भगवाञ्छाकायन्यः सुप्रीतस्त्वब्रवीद्राजानं महाराज बृहद्रथेक्ष्वाकुवꣳशध्वज शीघ्रमात्मज्ञः कृतकृत्यस्त्वं मरुन्नाम्नेति विश्रुतोऽसीत्ययꣳ वाव खल्वात्मा ते, यः कतमो भगवा ऽ इति, तꣳ होवाचेति ॥१॥

अथ यऽएषोऽसावाविष्टम्भनेनोर्ध्वमुत्क्रान्तो व्यथमानोऽव्यथमानस्तमः प्रणुदत्येषऽआत्मेत्याह भगवान्मैत्रिरित्येवꣳ ह्याहाथ य ऽ एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यतऽएषऽआत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति ॥२॥

अथ खल्वियं ब्रह्मविद्या सर्वोपनिषद्विद्या वा, राजन्नस्माकं भगवता मैत्रिणाऽऽख्याताऽहं

अथ मरुत्त--भरत--प्रभृतयः राजानः, मिषतः बन्धुवर्गस्य, महतीं श्रियं त्यक्त्वा, अस्मात् लोकात् अमुं लोकं प्रयाताः इति । अथ किं एतैः वा ? अपरे अन्ये गन्धर्व--असुर--यक्ष राक्षस-- भूतगण--पिशाच-- उरग-- ग्रह-- आदीनां निरोधनं पश्यामः, अथ किं एतैः वा ? अर्ण्यानां शोषणं महार्णवानां, शिखरिणां प्रपतनं, ध्रुवस्य प्रचलनं, व्रश्चनं वातरज्जूनां, निमज्जनं पृथिव्याः, स्थानादपसरणं सुराणां इति, एतद्विधे अस्मिन् संसारे, किं काम--उपभोगैः ? यैः एव अशितस्य असकृत् इह आवर्तनं दृश्यते, इति उद्धर्तुं अर्हसि इति । अन्धः उदपानस्थः भेकः इव, अहं, अस्मिन् संसारे, भगवन्! त्वं नो गतिः, त्वं नो गतिः ॥४॥ (१)

१. अथ भगवान् शाकायन्यः सुप्रीतः तु अब्रवीत् राजानं, महाराज ! बृहद्रथ ! इक्ष्वाकु--वंश-ध्वज ! शीघ्रं आत्मज्ञः कृतकृत्यः त्वं, मरुत्--नाम्ना इति विश्रुतः असि' इति । 'अयं वाव खलु आत्मा ते, यः '—

(राजा) ' कतमः भगवः ' ? इति

(ऋषिः) तं ह उवाच इति ॥१॥

२. ' अथ यः एषः असौ आविष्टंभनेन ऊर्ध्वं उत्क्रान्तः व्यथमानः अव्यथमानः तमः प्रणुदति, एषः आत्मा ' इति आह भगवान् मैत्रिः, इति एवं हि आह, 'अथ यः एषः संप्रसादः, अस्मात् शरीरात् समुत्थाय, परं ज्योतिः उप संपद्य, स्वेन रूपेण अभिनिष्पद्यते, एषः आत्मा' इति ह उवाच, 'एतत् अमृतं, अभयं, एतत् ब्रह्म' इति ॥२॥

३. अथ खलु इयं ब्रह्मविद्या, सर्वोपनिषद्विद्या वा, ' राजन्, अस्माकं भगवता मैत्रिणा आख्याता, अहं

ते कथयिष्यामीत्यथापहतपाप्मानस्तिग्मतेजसोऽध्र्वरेतसो वालखिल्याऽइति श्रूयन्तेऽथ क्रतुं प्रजापतिमब्रुवन्भगवञ्छकटमिवाचेतनमिदꣳ शरीरं कस्यैष खल्वीदृशो महिमाऽतीन्द्रियभूतस्य येनैतद्विधमेतच्चेतनवत्प्रतिष्ठापितं प्रचोदयिता वाऽअस्य यद्भगवन्वेत्स्यैतदस्माकं ब्रूहीति तान्होवाचेति ॥३॥

यो ह खलु वावोपरिस्थः श्रूयते गुणेष्विवोर्ध्वरेतसः स वाऽएष शुद्धः पूतः शून्यः शान्तः प्राणो निरात्माऽनन्तोऽक्षय्यः स्थिरः शाश्वतोऽजः स्वतन्त्रः स्वे महिम्नि तिष्ठत्यनेनेदꣳ शरीरं चेतनवत्प्रतिष्ठापितं प्रचोदयिता वैषोऽप्यस्येति ते होचुर्भगवन्कथमनेनेदृशेनाणिष्ठेनैतद्विधमिदं चेतनवत्प्रतिष्ठापितं प्रचोदयिता वैषोऽस्य कथमिति तान्होवाच ॥४॥

स वाऽएष३ सूक्ष्मोऽग्राह्योऽदृश्यः पुरुषसंज्ञो बुद्धिपूर्वमिहैवावर्ततेꣳशेनेति सुषुप्तस्येवाबुद्धिपूर्वꣳ विबोधायैवमित्यथ यो ह खलु वावैतस्य३ सोꣳऽशोऽयꣳ यश्चेतनमात्रः प्रतिपूरुषꣳ क्षेत्रज्ञः सङ्कल्पाध्यवसायाभिमानलिङ्गः प्रजापतिर्विश्वाख्यश्चेतनेनेदꣳ शरीरं चेतनवत्प्रतिष्ठापितं प्रचोदयिता वैषोऽप्यस्येति ते होचुर्भगवन्यद्यनेनेदृशेनाणिष्ठेनैतद्विधमिदं चेतनवत्प्रतिष्ठापितं प्रचोदयिता वैषोऽस्य कथमिति तान्होवाचेति ॥५॥

प्रजापतिर्वाऽएकोऽग्रेतिष्ठन्स नारमतैकः सऽआत्मानमभिध्यात्वा बह्वीः प्रजाऽअसृजत्ताऽअस्यैवात्मप्रबुद्धाऽअप्राणाः स्थाणुरिव तिष्ठमानाऽअपश्यत्स नारमत सोऽमन्यतैतासां प्रतिबोधनायाभ्यन्तरं प्राविशानीत्यथ स वायुमिवात्मानं कृत्वाऽभ्यन्तरं प्राविशत्सऽएको

ते कथयिष्यामि' इति । अथ अपहतपाप्मानः तिग्मतेजसा ऊर्ध्वरेतसः वालखिल्याः इति श्रूयन्ते । अथ क्रतुं प्रजापतिं अब्रुवन्—

'भगवन् ! शकटं इव अचेतनं इदं शरीरं,कस्य एषः खलु ईदृशः महिमा अतीन्द्रियभूतस्य, येन एतद्विधं एतत् चेतनवत् प्रतिष्ठापितं, प्रचोदयिता वा अस्य, यत् भगवन्, वेत्सि, एतद् अस्माकं ब्रूहि' इति, तान् ह उवाच इति ॥३॥

४. 'यः ह खलु वाव उपरिस्थः श्रूयते, गुणेषु इव ऊर्ध्वरेतसः, स वै एषः शुद्धः पूतः शून्यः शान्तः प्राणः निरात्मा अनन्तः अक्षय्यः स्थिरः शाश्वतः अजः स्वतन्त्रः स्वे महिम्नि तिष्ठति, अनेन इदं शरीरं चेतनवत् प्रतिष्ठापितं, प्रचोदयिता वा एषः अपि अस्य,' इति। ते ह ऊचुः 'भगवन्, कथं अनेन ईदृशेन अणिष्ठेन एतद्विधं इदं चेतनवत् प्रतिष्ठापितं, प्रचोदयिता वा एषः अस्य, कथं ?' इति तान् ह उवाच ॥४॥

५. 'सः वै एषः सूक्ष्मः अग्राह्यः अदृश्यः पुरुष-संज्ञः बुद्धिपूर्वं इह एव आवर्तते अंशेन,' इति ।

'सुषुप्तस्य इव अबुद्धिपूर्वं विबोधाय एवं' इति । अथ 'यः ह खलु वाव एतस्य सः अंशः अयं, यः चेतनमात्रः प्रति-पुरुषं क्षेत्रज्ञः संकल्पाध्यवसायाभिमानालिंगः प्रजापतिः विश्वाख्यः चेतनेन इदं शरीरं चेतनवत् प्रतिष्ठापितं, प्रचोदयिता वा एषः अपि अस्य', इति, ते ह ऊचुः 'भगवन् ! यदि अनेन ईदृशेन अणिष्ठेन एताद्विधं इदं चेतनवत् प्रतिष्ठापितं, प्रचोदयिता वा एषः अस्य, कथं ?' इति, तान् ह उवाच इति ॥५॥

६. 'प्रजापतिः वै एकः अग्रे तिष्ठन्. सः न अरमत,एक सः आत्मानं अभिध्यात्वा बह्वीः प्रजाः असृजत्, ताः अस्य एव आत्म-प्रबुद्धाः अप्राणाः स्थाणुः इव तिष्ठमानाः अपश्यत्, सः न अरमत, सः अमन्यत एतासां प्रतिबोधनाय अभ्यन्तरं प्राविशानि इति । अथ सः वायुं इव आत्मानं कृत्वा अभ्यन्तरं प्राविशत् । सः एकः

नाशंकत्स पञ्चधाऽत्मानꣳ विभज्योच्यते यः प्राणोऽपानः समानऽउदानो व्यानऽइत्यथायꣳ यऽऊर्ध्वमुत्क्रामत्येष वाव स प्राणोऽथ योऽयमवाङ् सङ्क्रामत्येष वाव सोऽपानोऽथ येन वाऽएताऽअनुगृहीताऽइत्येष वाव स व्यानोऽथ योऽयꣳ स्थविष्ठो धातुरन्नस्यापाने प्रापयत्यणिष्ठो वाऽङ्गेऽङ्गे समानयत्येष वाव स समानसंज्ञऽउत्तरꣳ व्यानस्य रूपं चैतेषामन्तरा प्रसूतिरेवोदानस्याथ योऽयं पीताशितमुद्गिरति निगिरतीति वैष वाव सऽउदानोऽथोपाꣳशुरन्तर्याममभिभवत्यन्तर्यामऽउपाꣳशु चैतयोरन्तराले वौष्ण्यं प्रासुवद्यदौष्ण्यꣳ स पुरुषोऽथ यः पुरुषः२ सोऽग्निर्वैश्वानरोऽप्यन्यत्राप्युक्तमयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन्भवति नैनं घोषं शृणोति स वाऽएष पञ्चधाऽऽत्मानꣳ विभज्य निहितो गुहायां मनोमयः प्राणशरीरो भारूपः सत्यसंङ्कल्पऽआकाशात्मेति स वा ए३षोऽस्माद्धृदन्तरादकृतार्थोऽमन्यतार्थानश्नानीत्यतः खानीमानि भित्त्वोदितः पञ्चभी रश्मिभिर्विषयानत्तीति बुद्धीन्द्रियाणि यानीमान्येतान्यस्य रश्मयः कर्म्मेन्द्रियाण्यस्य हया रथः शरीरं मनो नियन्ता प्रकृतिमयोऽस्य प्रतोदोऽनेन खल्वीरितं परिभ्रमतीदꣳ शरीरं चक्रमिव मृते च नेदꣳ शरीरं चेतनवत्प्रतिष्ठापितं प्रचोदयिता वैषोऽप्यस्येति ॥६॥

स वाऽ एष ऽआत्मेहोशन्ति कवयः सितासितैः कर्म्मफलैरनभिभूत ऽइव प्रति शरीरेषु चरत्यव्यक्तत्वात् सौक्ष्म्याददृश्यत्वादग्राह्यत्वान्निर्ममत्वाच्चानवस्थो

न अशकत्, सः पञ्चधा आत्मानं विभज्य, उच्यते यः प्राणः अपानः समानः उदानः व्यानः इति।

अथ अयं यः ऊर्ध्वं उत्क्रामति, एषः वाव सः प्राणः, अथ यः अयं अवाङ् संक्रामति, एषः वाव सः अपानः, अथ येन वै एता अनुगृहिताः इति, एषः वाव सः व्यानः, अथ यः अयं स्थविष्ठः धातुः अन्नस्य अपाने प्रापयति, अणिष्ठः वा अङ्गे अङ्गे समानयति, एषः वाव सः समानसंज्ञः, उत्तरं व्यानस्य रूपं च, एतेषां अन्तरा प्रसूतिः एव उदानस्य, अथ यः अयं पीताशीतं उद्गिरति, निगिरति इति वा, एषः वाव सः उदानः, अथ उपांशुः अन्तर्यामं अभिभवति, अन्तर्यामः उपांशु च एतयोः अन्तराले वा औष्ण्यं प्रासुवत्, यत् औष्ण्यं सः पुरुषः, अथ यः पुरुषः सः अग्निः वैश्वानरः, अपि अन्यत्र अपि उक्तं—

'* अयं अग्निः वैश्वानरः, यः अयं अन्तःपुरुषे, येन इदं अन्नं पच्यते। यद् इदं अद्यते, तस्य एषः घोषः भवति, यं एतत् कर्णौ अपिधाय शृणोति, सः यदा उत्क्रमिष्यन् भवति, न एनं घोषं शृणोति,' सः वै एषः पञ्चधा आत्मानं विभज्य, निहितः गुहायां, मनोमयः प्राणशरीरः, भारूपः सत्यसंकल्पः आकाशात्मा' इति। 'सः वै एषः अस्मात् हृदन्तरात् अकृतार्थः अमन्यत, अर्थान् अश्नानि इति, अतः खानि इमानि भित्त्वा उदितः पञ्चभिः रश्मिभिः विषयान् अत्ति, इति।

बुद्धीन्द्रियाणि यानि इमानि एतानि अस्य रश्मयः, कर्मेन्द्रियाणि अस्य हयाः, रथः शरीरं, मनः नियन्ता, प्रकृतिमयः अस्य प्रतोदः, अनेन खलु ईरितं परिभ्रमति इदं शरीरं चक्रं इव, मृते च न इदं शरीरं चेतनवत् प्रतिष्ठापितं, प्रचोदयिता वा एषः अपि अस्य इति ॥६॥

७. सः वै एषः आत्मा, इह उशन्ति कवयः सितासितैः कर्मफलैः अनभिभूतः इव प्रति शरीरेषु चरति, अव्यक्तत्वात्, सौक्ष्म्यात्, अदृश्यत्वात्, अग्राह्यत्वात् निर्ममत्वात् च अनवस्थः,

---

* बृ० आ० उ० ५।९।१

सति कर्ता कर्तैवावस्थः स वाऽएष शुद्धः स्थिरोऽचलश्चालेप्योऽव्यग्रो निःस्पृहः प्रेक्षक-वदवस्थितः स्वस्थश्च कृतभुग्गुणमयेन पटेनात्मानमन्तर्द्धायावस्थितऽइत्यवस्थित इति ॥७॥

॥ इति मैत्रायणीयारण्यके द्वितीयः प्रपाठकः ॥२॥

॥ अथ तृतीयः प्रपाठकः ॥

॥ ओ३म् ॥ ते होचुर्भगवन्यद्येवमस्यात्मनो महिमानꣳ सूचयसीत्यन्यो वाऽपरः कोऽयमात्माख्यो३ योऽयꣳ सितासितैः कर्म्मफलैरभिभूयमानः सदसद्योनिमापद्यताऽइत्यवाङ्चोर्ध्वां वा गतिं द्वन्द्वैरभिभूयमानः परिभ्रमतीति कतमऽएषऽइति तान्होवाचेति ॥१॥

अस्ति खल्वन्योऽपरो भूतात्माख्यो३ योऽयꣳ सितासितैः कर्म्मफलैरभिभूयमानः सदसद्योनिमापद्यताऽइत्यवाङ्चोर्ध्वा वा गतिर्द्वन्द्वैरभिभूयमानः परिभ्रमतीत्यस्योपव्याख्यानं पञ्च तन्मात्रा भूतशब्देनोच्यन्तेऽथ पञ्चमहाभूतानि भूतशब्देनोच्यन्तेऽथ तेषाꣳ यत्समुदयं तच्छरीरमित्युक्तमथ यो ह खलु वाव शरीरमित्युक्तꣳ स भूतात्मेत्युक्तमथाश्रितोऽस्यात्मा बिन्दुरिव पुष्कराऽइति स वा एषोऽभिभूतः प्राकृतैर्गुणैरित्यथोऽभिभूतत्वात्सम्मूढत्वं प्रयातः सम्मूढत्वात्मस्थं प्रभुं भगवन्तं कारयितारं नापश्यद्गुणौघैरुह्यमानः कलुषीकृतश्चास्थिरश्चञ्चलो लुप्यमानः सस्पृहो व्यग्रश्चाभिमानित्वं प्रयातऽइत्यहꣳ सो ममेदमित्येवं मन्यमानो निबध्नात्यात्मनाऽऽत्मानं जालेनेव खचरः कृतस्यानुफलैरभिभूयमानः परिभ्रमतीति ॥२॥

सति कर्ता, एव अवस्थः । सः वै एषः शुद्धः, स्थिरः, अचलः च अलेप्यः, अव्यग्रः, निस्पृहः, प्रेक्षकवत् अवस्थितः, स्वस्थः च कृतभुग्, गुणमयेन पटेन आत्मानं अन्तर्द्धाय अवस्थितः इति । अवस्थितः इति ॥७॥ (२)

१. ते ह ऊचुः–भगवन्! यदि एवं अस्य आत्मनः महिमानं सूचयसि, इति, अन्यः वा अपरः कः अयं आत्माख्यः, यः अयं सितासितैः कर्मफलैः अभिभूयमानः, सदसद्योनिं आपद्यते, इति, अवाङ् च ऊर्ध्वां वा गतिं, द्वन्द्वैः अभिभूयमानः, परिभ्रमति, इति, कतमः एषः? इति । तान् ह उवाच, इति ॥१॥

२. " अस्ति खलु अन्यः अपरः भूतात्माख्यः यः अयं सितासितैः कर्मफलैः अभिभूयमानः, सदसद्योनिं आपद्यते, इति अवाङ् च ऊर्ध्वां वा गतिः, द्वन्द्वैः अभिभूयमानः परिभ्रमति, इति, अस्य उपव्याख्यानम् ।

'पञ्च तन्मात्रा भूतशब्देन उच्यन्ते, अथ पञ्चमहाभूतानि भूतशब्देन उच्यन्ते, अथ तेषां यत् समुदयं तत् शरीरं, इति उक्तं, अथ यः ह खलु वाव शरीरं इति उक्तम् । सः भूतात्मा इति उक्तं, अथ आश्रितः अस्य आत्मा, बिन्दुः इव पुष्करे इति, स वै एषः अभिभूतः प्राकृतैः गुणैः इति, अथो अभिभूतत्वात् संम्मूढत्वं प्रयातः, संमूढत्वात् आत्मस्थं प्रभुं भगवन्तं, कारयितारं न अपश्यत्, गुणौघैः उह्यमानः, कलुषीकृतः च अस्थिरः, चञ्चलः, लुप्यमानः, सस्पृहः, व्यग्रः च अभिमानित्वं प्रयातः' इति ।

अहं सः, मम इदं, इति एवं मन्यमानः, निबध्नाति आत्मना आत्मानं, जालेन इव खचरः, कृतस्य अनुफलैः अभिभूयमानः परिभ्रमति इति ॥२॥

अथान्यत्राप्युक्तꣳ यः कर्ता सोऽयꣳ वै भूतात्मा करणैः कारयिताऽन्तःपुरुषोऽथ यथाऽग्निनाऽयष्पिण्डो वाऽभिभूतः कर्तृभिर्हन्यमानो नानात्वमुपैत्येवꣳ वाव खल्वसौ भूतात्माऽन्तःपुरुषेणाभिभूतो गुणैर्हन्यमानो नानात्वमुपैति चतुर्जालं चतुर्दशविधं चतुरशीतिधा परिणतं भूतगणमेतद्वै नानात्वस्य रूपं तानि ह वा एतानि पुरुषेणेरितानि चक्रमिव मृत्पचेनेत्यथ यथाऽयष्पिण्डे हन्यमाने नाग्निरभिभूयत्येवं नाभिभूयत्यसौ पुरुषोऽभिभूयत्ययं भूतात्मोपसꣳसृष्टत्वादिति ॥३॥

अथान्यत्राप्युक्तꣳ शरीरमिदं मैथुनादेवोद्भूतꣳ सꣳवृद्ध्युपेतं निरयेऽथ मूत्रद्वारेण निष्क्रान्तमस्थिभिश्चितं माꣳसेनानुलिप्तं चर्मणाऽवनद्धꣳ विण्मूत्रपित्तकफमज्जामेदोवसाभिरन्यैश्चामयैर्बहुभिः परिपूर्णं कोषऽइव वसुनेति ॥४॥

अथान्यत्राप्युक्तꣳ सम्मोहो भयꣳ विषादो निद्रा तन्द्री प्रमादो जरा शोकः क्षुत्पिपासा कार्पण्यं क्रोधो नास्तिक्यमज्ञानं मात्सर्यं नैष्कारुण्यं मूढत्वं निर्व्रीडत्वं निराकृतित्वमुद्धतत्वमसमत्वमिति तामसान्यथ तृष्णा स्नेहो रागो लोभो हिꣳसा रतिर्द्दृष्टिर्व्यावृत्तत्वमीर्ष्या काममस्थिरत्वं चलत्वꣳ व्यग्रत्वं जिगीषाऽर्थोपार्जनं मित्रानुग्रहणं परिग्रहावलम्बोऽनिष्टेष्विन्द्रियार्थेषु द्विष्टिरिष्टेष्वभिष्वङ्गः शुक्रः स्वरोन्नतमास्त्विति राजसान्येतैः परिपूर्णऽएतैरभिभूतऽइत्ययं भूतात्मा तस्मान्नानारूपाण्याप्नोतीत्याप्नोति ॥५॥

॥ इति मैत्रायणीयारण्यके तृतीयः प्रपाठकः ॥३॥

---

३. अथ अन्यत्र अपि उक्तम्—

यः कर्ता सः अयं वै भूतात्मा, करणैः कारयिता, अन्तःपुरुषः। अथ यथा अग्निना अयष्पिण्डः वा अभिभूतः, कर्तृभिः हन्यमानः नानात्वं उपैति, एवं वाव खलु असौ भूतात्मा अन्तःपुरुषेण अभिभूतः, गुणैः हन्यमानः नानात्वं उपैति। चतुर्जालं चतुर्दश-विधं चतुरशीतिधा परिणतं भूतगणं, एतत् वै नानात्वस्य रूपं, तानि ह वै एतानि, पुरुषेण ईरितानि, चक्रं इव मृत्पचेन इति। अथ यथा अयष्पिण्डे हन्यमाने न अग्निः अभिभूयति, एवं न अभिभूयति असौ पुरुषः, अभिभूयति अयं भूतात्मा उप संसृष्टत्वात् इति ॥३॥

४. अथ अन्यत्र अपि उक्तम्—

शरीरं इदं मैथुनात् एव उद्भूतं, संवृध्युपेतं, निरये, अथ मूत्रद्वारेण निष्क्रान्तं, अस्थिभिः चितं, मांसेन अनुलिप्तं, चर्मणा अवनद्धं, विट्-मूत्र-पित्त-कफ-मज्जा-मेदो-वसाभिः अन्यैः च आमयैः बहुभिः परिपूर्णं, कोषः इव वसुना इति ॥४॥

५. अथ अन्यत्र अपि उक्तम्—

संमोहः, भयं, विषादः, निद्रा, तंद्री प्रमादः, जरा, शोकः, क्षुत्, पिपासा, कार्पण्यं, क्रोधः, नास्तिक्यं, अज्ञानं, मात्सर्यं, नैष्कारुण्यं, मूढत्वं, निर्व्रीडत्वं, निराकृतित्वं उद्धतत्वं, असमत्वं, इति तामसानि।

अथ तृष्णा, स्नेहः, रागः, लोभः, हिंसा, रतिः, द्विष्टिः, व्यावृत्तत्वं, ईर्ष्या, कामं, अस्थिरत्वं, चलत्वं, व्यग्रत्वं, जिगीषा, अर्थोपार्जनं, मित्रानुग्रहणं, परिग्रहावलंबः, अनिष्टेषु इन्द्रियार्थेषु द्विष्टिः, इष्टेषु अभिष्वङ्गः, शुक्रः, स्वरोन्नतं, अस्तु इति राजसानि।

एतैः, परिपूर्णः, एतैः अभिभूतः, इति अयं भूतात्मा, तस्मात् नानारूपाणि आप्नोति, इति आप्नोति ॥५॥ (३)

॥ अथ चतुर्थः प्रपाठकः ॥

॥ ॐ ॥ ते ह खलु वावोर्ध्वरेतसोऽतिविस्मिताऽअभिसमेत्योचुर्भगवन्नमस्तेऽस्त्वनुशाधि त्वमस्माकं गतिरन्या न विद्यतऽइत्यस्य को विधिर्भूतात्मनो येनेदꣳ हित्वाऽऽत्मन्येव सायुज्यमुपैति तान्होवाचेति ॥१॥

अथान्यत्राप्युक्तं महानदीषूर्मयऽइवानिवर्तकमस्य यत्पुराकृतꣳ समुद्रवेलेव दुर्निवार्यमस्य मृत्योरागमनꣳ सदसत्फलमयैः पाशैः पङ्गुरिव बद्धं बन्धनस्थस्येवास्वातन्त्र्यꣳ यमविषयस्थस्येव बहुभयावस्थं मदिरोन्मत्तऽइव मोहमदिरोन्मत्तं पाप्मना गृहीतऽइव भ्राम्यमाणं महोरगदष्टऽइव विषयदष्टं महान्धकारमिव रागान्धमिन्द्रजालमिव मायामयꣳ स्वप्नऽइव मिथ्यादर्शनं कदलीगर्भऽइवासारं नटऽइव क्षणवेषं चित्रभित्तिरिव मिथ्यामनोरममित्यथोक्तꣳ

शब्दस्पर्शादयो ह्यर्था मर्त्येऽअनर्थाऽइव स्थिताः ॥
येषाꣳ सक्तस्तु भूतात्मा न स्मरेत परं पदम् ॥२॥

अयꣳ वाव खल्वस्य प्रतिविधिर्भूतात्मनो यद्वेदविद्याधिगमः स्वधर्मस्यानुचरणꣳ स्वाश्रमेष्वेवानुक्रमणꣳ स्वधर्मस्य वाऽएतद्व्रतꣳ स्तम्बशाखेवेतराण्यनेनोर्ध्वभाग्भवत्यन्यथाऽवाङ्पतत्येष स्वधर्मोऽभिहितो यो वेदेषु न स्वधर्मातिक्रमेणाश्रमी भवत्याश्रमेष्वेवावस्थस्तपस्वी वेत्युच्यतऽइत्येतदयुक्तं नातपस्कस्यात्मज्ञानेऽधिगमः कर्मसिद्धिर्वेत्येवꣳ ह्याह ॥

---

१. ते ह खलु वाव ऊर्ध्वरेतसः अतिविस्मिताः अभिसमेत्य ऊचुः– " भगवन् नमः ते अस्तु, अनुशाधि, त्वं अस्माकं गतिः, अन्या न विद्यते, इति । अस्य कः विधिः भूतात्मनः, येन इदं हित्वा आत्मनि एव सायुज्यं उपैति ।' तान् ह उवाच इति ॥१॥

२. अथ अन्यत्र अपि उक्तम्—

महानदीषु ऊर्मयः इव अनिवर्तकं अस्य यत् पुराकृतं, समुद्रवेला इव दुर्निवार्यम्, अस्य मृत्योः आगमनं, सदसत्फलमयैः पाशैः पङ्गुः इव बद्धं, बन्धनस्थस्य इव अस्वातंत्र्यं, यम-विषयस्थस्य इव बहुभयावस्थं, मदिरोन्मत्तः इव मोहमदिरोन्मत्तं, पाप्मना गृहीतः इव भ्राम्यमाणं, महोरगदष्टः इव विषयदष्टं, महान्धकारं इव रागान्धं, इन्द्रजालं इव मायामयं, स्वप्नः इव मिथ्यादर्शनं, कदलीगर्भः इव असारं, नटः इव क्षणवेषं, चित्रभितिः इव मिथ्या मनोरमं, इति । अथ उक्तम्—

शब्द-स्पर्शादयः हि अर्थाः, मर्त्ये अनर्थाः इव स्थिताः । येषां सक्तः तु भूतात्मा न स्मरेत परं पदम् ॥२॥

३. अयं वाव खलु अस्य प्रतिविधिः भूतात्मनः, यत् वेदविद्याधिगमः, स्वधर्मस्य अनुचरणं, स्वाश्रमेषु एव अनुक्रमणं, स्वधर्मस्य वै एतद् व्रतं, स्तंबशाखा इव इतराणि, अनेन ऊर्ध्वभाक् भवति, अन्यथा अवाङ् पतति, एषः स्वधर्मः अभिहितः, यः वेदेषु, न स्वधर्मातिक्रमेण आश्रमी भवति । आश्रमेषु एव अवस्थः तपस्वी वा इति उच्यते इति, एतत् अयुक्तं, न अतपस्कस्य आत्मज्ञाने अधिगमः, कर्मसिद्धिः वा, इति, एवं हि आह ।

तपसा प्राप्यते सत्त्वꣳ सत्त्वात्सम्प्राप्यते मनः ॥
मनसः प्राप्यते ह्यात्मा यमाप्त्वा न निवर्ततऽइति ॥३॥

अस्ति ब्रह्मेति ब्रह्मविद्याविदो ब्रह्मवित् ॥ ब्रह्मद्वारमिदमित्येवैतदाह यस्तपसाऽपहतपाप्मा ॥ ॐ ब्रह्मणो महिमेत्येवैतदाह यस्तु युक्तोऽजस्रं चिन्तयति तस्माद्विद्यया तपसा चिन्तया चोपलभते ब्रह्म सद्ब्रह्मणः परऽएता भवत्याधिदैवत्वं देवेभ्यश्चेत्यक्षय्यमपरिमितमनामयꣳ सुखमश्नुते यऽएवꣳ विद्वाननेन त्रिकेण ब्रह्मोपास्तेऽथ यैः परिपूर्णोऽभिभूतोऽयꣳ रथितश्च तैर्वैवमुक्तस्त्वात्मन्येव सायुज्यमुपैति ॥४॥

ते होचुर्भगवन्नभिवाद्यसीत्यभिवाद्यसीति निहितमस्माभिरेतद्यथावदुक्तं मनसीत्यथोत्तरं प्रश्नमनुब्रूहीत्यग्निर्वायुरादित्यः कालो यः प्राणोऽन्नं ब्रह्मा रुद्रो विष्णुरित्येकेऽन्यमभिध्याय-न्त्येकेऽन्यꣳ श्रेयः कतमो यः सोऽस्माकं ब्रूहीति तान्होवाचेति ॥५॥

ब्रह्मणो वावैताऽअग्र्याः स्तनवः परस्यामृतस्याशरीरस्य तस्यैव लोके प्रतिमोदतीह यो यस्यानुषक्तऽइत्येवꣳ ह्याह ब्रह्म खल्विदꣳ वाव सर्वꣳ या वास्याऽअग्र्यास्तनवस्ताऽ-अभिध्यायेदर्चयेन्निन्हुयाच्चातस्ताभिः सहैवोपर्युपरि लोकेषु चरत्यथ कृत्स्नः क्षयऽएकत्वमेति पुरुषस्य पुरुषस्य ॥६॥

॥ इति मैत्रायणीयारण्यके चतुर्थः प्रपाठकः ॥४॥

तपसा प्राप्यते सत्त्वं सत्त्वात् संप्राप्यते मनः।
मनसः प्राप्यते हि आत्मा, यं आप्त्वा न निवर्तते इति ॥३॥

'अस्ति ब्रह्म' इति, ब्रह्मविद्याविदः ब्रह्मवित्। 'ब्रह्मद्वारं इदं' इति एव एतद् आह, यः तपसा अपहतपाप्मा ॥

ॐ ब्रह्मणः महिमा इति एव एतद् आह; यः तु युक्तः अजस्रं चिन्तयति, तस्मात् विद्यया, तपसा, चिन्तया च उपलभते ब्रह्म, सत्, ब्रह्मणः परः एता भवति, इति आधिदैवत्वं, देवेभ्यः च इति अक्षय्यं, अपरिमितं, अनामयं, सुखं अश्नुते, यः एवं विद्वान् अनेन त्रिकेण ब्रह्म उपास्ते। अथ यैः परिपूर्णः अभिभूतः, अयं रथितः च, तैः वा एवं उक्तः, तु आत्मनि एव सायुज्यं उपैति ॥४॥

ते ह ऊचुः 'भगवन् अभिवादी असि' इति अभिवादी असि इति, निहितं अस्माभिः, एतद् यथावत् उक्तं मनसि इति।

अथ उत्तरं प्रश्नं अनुब्रूहि इति।

अग्निः, वायुः, आदित्यः, कालः, यः प्राणः, अन्नं, ब्रह्मा, रुद्रः, विष्णुः, इति एके अन्यं अभिध्यायन्ति, एके अन्यं, श्रेयः कतमः यः सः अस्माकं ब्रूहि इति। तान् ह उवाच इति ॥५॥

ब्रह्मणः वाव एताः अग्र्याः स्तनवः, परस्य अमृतस्य अशरीरस्य, तस्य एव लोके प्रतिमोदति इह यः यस्य अनुषक्तः इति, एवं हि आह– 'ब्रह्म खलु इदं वाव सर्वं, या वास्याः अग्र्याः तनवः, ताः अभिध्यायेत्, अर्चयेत्, निन्हुयात् च, अतः ताभिः सह एव उपरि उपरि लोकेषु चरति, अथ कृत्स्नः, क्षयः एकत्वं एति पुरुषस्य, पुरुषस्य ॥६॥

॥ इति मैत्रायणीयारण्यके चतुर्थः प्रपाठकः ॥४॥

॥ अथ पञ्चमः प्रपाठकः ॥

॥ ॐ ॥ अथ यथेयं कौत्सायनी स्तुतिः ॥

त्वं ब्रह्मा त्वं च वै विष्णुस्त्वꣳ रुद्रस्त्वं प्रजापतिः ॥
त्वमग्निर्वरुणो वायुस्त्वमिन्द्रस्त्वं निशाकरः ॥१॥
त्वं मनस्त्वꣳ यमस्त्वं पृथिवी त्वꣳ विश्वं खमथाच्युतः ॥
स्वार्थे स्वाभाविकेऽर्थे च बहुधा सꣳस्थितिस्त्वयि ॥२॥
विश्वेश्वर नमस्तुभ्यꣳ विश्वात्मा विश्वकर्मकृत् ॥
विश्वभुग्विश्वमायुस्त्वꣳ विश्वक्रीडारतिः प्रभुः ॥३॥
नमः शान्तात्मने तुभ्यं नमो गुह्यतमाय च ॥
अचिन्त्यायाप्रमेयाय अनादिनिधनाय च ॥४॥ इति ॥१॥

तमो वाऽइदमग्रऽआसीदेकं तत्परे स्यात्तत्परेणेरितꣳ विषमत्वं प्रयात्येतद्रूपꣳ वै रजस्तद्रजः खल्वीरितꣳ विषमत्वं प्रयात्येतद्वै सत्त्वस्य रूपं तत्सत्त्वमेवेरितꣳ रसः सम्प्रास्रव३त्सोꣳ३ऽशोऽयꣳ यश्चेतनमात्रः प्रतिपुरुषः क्षेत्रज्ञः सङ्कल्पाध्यवसायाभिमानलिङ्गः प्रजापतिर्विश्वेत्यस्य प्रागुक्ताऽएतास्तनवोऽथ यो ह खलु वावास्य तामसोꣳऽशोऽसौ स ब्रह्मचारिणो३योऽयꣳ रुद्रोऽथ यो ह खलु वा वास्य राजसोꣳऽशोऽसौ स ब्रह्मचारिणो३योऽयं ब्रह्माथ यो ह खलु वावास्य सात्त्विकोꣳऽशोऽसौ स ब्रह्मचारिणो३ योऽयꣳ विष्णुः स वाऽएषऽ एकस्त्रिधाभूतोऽष्टधैकादशधा द्वादशधाऽपरिमितधा वोद्भूतऽउद्भूतत्वाद्भूतं भूतेषु चरति प्रविष्टः स भूतानामधिपतिर्बभूवऽइत्यसावात्माऽन्तर्बहिश्चान्तर्बहिश्च ॥२॥

॥ इति मैत्रायणीयारण्यके पञ्चमः प्रपाठकः ॥५॥

॥ अथ पञ्चमः प्रपाठकः ॥

१. अथ यथा इयं कौत्सायनी स्तुतिः—
त्वं ब्रह्मा, त्वं च वै विष्णुः, त्वं रुद्रः, त्वं प्रजापतिः ।
त्वं अग्निः, वरुणः, वायुः, त्वं इन्द्रः, त्वं निशाकरः॥१॥
त्वं मनः, त्वं यमः, त्वं पृथिवी, त्वं विश्वं, खं, अथ अच्युतः ।
स्वार्थे, स्वाभाविके अर्थे च बहुधा संस्थितिः त्वयि ॥२॥
विश्वेश्वर ! नमः तुभ्यं, विश्वात्मा, विश्वकर्मकृत् ।
विश्वभुक् विश्वं आयुः त्वं विश्वक्रीडारतिः प्रभुः ॥३॥
नमः शान्तात्मने तुभ्यं नमः गुह्यतमाय च ।
अचिन्त्याय, अप्रमेयाय, अनादिनिधनाय च॥४॥ इति॥१॥

तमः वै इदं अग्रे आसीत् एकं, तत् परे स्यात् तत् परेण ईरितं विषमत्वं प्रयाति, एतद् रूपं वै रजः, तद् रजः खलु ईरितं विषमत्वं प्रयाति, एतद् वै सत्त्वस्य रूपं, तत् सत्त्वं एव ईरितं रसः संप्रास्रवत्, सः अंशः अयं, यः चेतनमात्रः, प्रतिपुरुषः, क्षेत्रज्ञः, संकल्पाध्यवसायाभिमानलिङ्गः प्रजापतिः, विश्व इति, अस्य प्रागुक्ताः, एताः तनवः । अथ यः ह खलु वाव अस्य तामसः अंशः, असौ सः ब्रह्मचारिणः यः अयं रुद्रः। अथ यः ह खलु वाव अस्य राजसः अंशः, असौ सः ब्रह्मचारिणः, यः अयं ब्रह्मा । अथ यः ह खलु वाव सात्त्विकः अंशः असौ सः ब्रह्मचारिणः, यः अयं विष्णुः, सः वै एषः एकः त्रिधाभूतः अष्टधा एकादशधा द्वादशधा अपरिमितधा वा उद्भूतः उद्भूतत्वात्–भूतं भूतेषु चरति प्रविष्टः, सः भूतानां अधिपतिः ×बभूव, इति असौ आत्मा अन्तः बहिः च, अन्तः बहिः च॥२॥

॥ इति मैत्रायणीयारण्यके पञ्चमः प्रपाठकः ॥५॥

॥ अथ षष्ठः प्रपाठकः ॥

॥ ॐ ॥ द्विधा वाऽएषऽआत्माऽऽत्मानं बिभर्त्ययꣳ यः प्राणो यश्चासाऽआदित्योऽथ द्वौ वाऽएताऽअस्य पन्थानावन्तर्बहिश्चाहोरात्रेणैतौ व्यावर्तेतेऽसौ वाऽआदित्यो बहिरात्माऽन्तरात्मा प्राणोऽतो बहिरात्मकया गत्याऽन्तरात्मनोऽनुमीयते गतिरित्येवꣳ ह्याहाथ यः कश्चिद्विद्वानपहतपाप्माऽक्षाध्यक्षोऽवदातमनास्तन्निष्ठऽआवृत्तचक्षुः सोऽन्तराऽऽत्मकया गत्या बहिरात्मनोऽनुमीयते गतिरित्येवꣳ ह्याहाथ यऽएषोऽन्तरादित्ये हिरण्मयः पुरुषो यः पश्यतीमाꣳ हिरण्यवत्सः सऽएषोऽन्तरे हृत्पुष्करऽएवाश्रितोऽन्नमत्ति ॥१॥

अथ यऽएषोऽन्तरे हृत्पुष्करऽएवाश्रितोऽन्नमत्ति सऽएषोऽग्निर्दिवि श्रितः सौरः कालाख्योऽदृश्यः सर्वभूतान्यन्नमत्तीति कः पुष्करः किम्मयो वेत्तीदꣳ वाव तत्पुष्करꣳ योऽयमाकाशस्येमाश्चतस्रो दिशश्चतस्रऽउपदिशो दलसꣳस्था आसुरर्वाग्विचरतऽएतौ प्राणादित्याऽएताऽउपासीतऽओमित्येतदक्षरेण व्याहृतिभिः सावित्र्या चेति ॥२॥

द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं चाथ यन्मूर्तं तदसत्यꣳ यदमूर्तं तत्सत्यꣳ यत्सत्यं तद्ब्रह्म यद्ब्रह्म तज्ज्योतिर्यज्ज्योतिः सऽआदित्यः स वाऽएषऽओमित्येतदात्माऽभवत्स त्रेधाऽऽत्मानꣳ व्यकुरुतऽओमिति तिस्रो मात्राऽएताभिः सर्वमिदमोतं प्रोतं चैवास्मीत्येवꣳ ह्याहैतद्वाऽआदित्यऽओमित्येवं ध्यायतऽआत्मानꣳ युञ्जीतेति ॥३॥

॥ अथ षष्ठः प्रपाठकः ॥

॥ ॐ ॥ द्विधा वै एषः आत्मा आत्मानं बिभर्ति, अयं यः प्राणः, यः च असौ आदित्यः, अथ द्वौ वै एतौ अस्य पन्थानौ, अन्तः बहिः च, अहोरात्रेण एतौ व्यावर्तेते, असौ वै आदित्यः बहिरात्मा, अन्तरात्मा प्राणः, अतः बहिः आत्मकया गत्या अन्तरात्मनः अनुमीयते गतिः, इति एवं हि आह—

अथ यः कश्चित् विद्वान् अपहत-पाप्मा अक्षाध्यक्षः अवदातमनाः तन्निष्ठः आवृत्तचक्षुः, सः अन्तरा आत्मकया गत्या बहिरात्मनः अनुमीयते गतिः, इति एवं हि आह ।

अथ य एषः अन्तरादित्ये हिरण्मयः पुरुषः, यः पश्यति इमां हिरण्यवत्सः, सः एषः अन्तरे हृत्पुष्करे एव आश्रितः अन्नं अत्ति ॥१॥

अथ यः एषः अन्तरे हृत्पुष्करे एव आश्रितः अन्नं अत्ति, सः एषः अग्निः दिवि श्रितः, सौरः, कालाख्यः, अदृश्यः, सर्वभूतानि अन्नं अत्ति इति, कः पुष्करः किम्मयः वेत्ति, इदं वाव तत् पुष्करं, यः अयं आकाशस्य इमाः चतस्रः दिशः, चतस्रः उपदिशः, दलसंस्था आसुः, अर्वाक् विचरतः, एतौ प्राणादित्यौ, एतौ उपासीत, ॐ इति एतद् अक्षरेण व्याहृतिभिः सावित्र्या च इति ॥२॥

द्वे वाव ब्रह्मणः रूपे, मूर्तं च अमूर्तं च । अथ यत् मूर्तं तत् असत्यं, यद् अमूर्तं तत् सत्यं, यत् सत्यं तद् ब्रह्म, यत् ब्रह्म तत् ज्योतिः, यत् ज्योतिः स आदित्यः, स वै एषः, ॐ इति एतद् आत्मा अभवत्, सः त्रेधा आत्मानं व्यकुरुते, ॐ इति तिस्रः मात्राः, एताभिः सर्वं इदं ओतं प्रोतं च एव अस्मि, इति एवं हि आह । एतद् वै आदित्यः ॐ इति एवं ध्यायत, आत्मानं युञ्जीत इति ॥३॥

---

१ अत्रासन्धिस्तु छान्दस इति ध्येयम् ।

अथान्यत्राप्युक्तमथ खलु यऽउद्गीथः स प्रणवो यः प्रणवः सऽउद्गीथऽइत्यसौ वाऽआदित्यऽउद्गीथऽएष प्रणवऽइत्येवꣳ ह्याहोद्गीथं प्रणवाख्यं प्रणेतारं भारूपꣳ विगतनिद्रꣳ विजरꣳ विमृत्युं त्रिपदं त्र्यक्षरं पुनः पञ्चधा ज्ञेयं निहितं गुहायामित्येवꣳ ह्याहोर्ध्वमूलं त्रिपाद्ब्रह्म शाखाऽआकाशवाय्वग्न्युदकभूम्यादयऽएकोऽश्वत्थनामैतद्ब्रह्मैतत्तस्यैतत्तेजो यदसाऽआदित्यऽओमित्येतदक्षरस्य चैतत्तस्मादोमित्यनेनैतदुपासीताजस्रमित्येकोऽस्य सम्बोधयितेत्येवꣳ ह्याह ॥

एतदेवाक्षरं पुण्यमेतदेवाक्षरं परम् ॥
एतदेवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥४॥

अथान्यत्राप्युक्तꣳ स्वनवत्येषाऽस्य तनूर्याऽओमिति स्त्रीपुन्नपुꣳसकमिति लिङ्गवत्येषाऽथाग्निर्वायुरादित्यऽइति भास्वत्येषाऽथ ब्रह्मा रुद्रो विष्णुरित्यधिपतिवत्येषाऽथ गार्हपत्यो दक्षिणाग्निराहवनीयऽइतिमुखवत्येषाऽथऽऋग्यजुः सामेति विज्ञानवत्येषाऽथ भूर्भुवः३स्वरिति लोकवत्येषाऽथ भूतं भव्यं भविष्यदितिकालवत्येषाऽथ प्राणोऽग्निः सूर्यऽइति प्रतापवत्येषाऽथान्नमापश्चन्द्रमाऽइत्याप्यायनवत्येषाऽथ बुद्धिर्मनोऽहङ्कारऽइति चेतनवत्येषाऽथ प्राणोऽपानोव्यानऽइति प्राणवत्येषेत्येतद्वाऽओमित्युक्तेनैताः प्रस्तुताऽअर्चिताऽअर्पिता भवन्तीत्येवꣳ ह्याहैतद्वै सत्यकाम परं चापरं च ब्रह्म यदोमित्येदक्षरमिति ॥५॥

अथ अन्यत्र अपि उक्तम्—

अथ खलु यः उद्गीथः, सः प्रणवः, यः प्रणवः सः उद्गीथः इति, असौ वै आदित्यः उद्गीथः एषः प्रणवः इति, एवं हि आह। 'उद्गीथं प्रणवाख्यं प्रणेतारं भारूपं विगतनिद्रं विजरं विमृत्युं त्रिपदं त्र्यक्षरं, पुनः पञ्चधा ज्ञेयं, निहितं गुहायां इति, एवं हि आह। ऊर्ध्वमूलं त्रिपाद् ब्रह्म, शाखाः आकाश-वायु-अग्नि-उदक-भूमि- आदयः, एकः अश्वत्थनामा, एतद् ब्रह्म, एतत् तस्य एतत् तेजः, यत् असौ आदित्यः, ओँ इति एतत् अक्षरस्य च एतद्, तस्मात् ओँ इत्यनेन एतद् उपासीत, अजस्रं इति एकः अस्य सम्बोधयिता इति, एवं हि आह।
एतत् एव अक्षरं पुण्यम्, एतत् एव अक्षरं परम्।
एतत् एव अक्षरं ज्ञात्वा, यः यत् इच्छति तस्य तत् ॥४

अथ अन्यत्र अपि उक्तम्—

स्वनवती एषा अस्य तनूः, या ओँ इति, स्त्री-पुन्नपुंसकं इति लिङ्गवती एषा; अथ अग्निः, वायुः, आदित्यः इति भास्वती एषा; अथ ब्रह्मा, रुद्रः, विष्णुः इति अधिपतिवती एषा; अथ गार्हपत्यः, दक्षिणाग्निः, आहवनीयः इति मुखवती एषा; अथ ऋक्, यजुः, साम, इति विज्ञानवती एषा; अथ भूः, भुवः, स्वः इति लोकवती एषा, अथ भूतं, भव्यं, भविष्यत् इति कालवती एषा; अथ प्राणः, अग्निः, सूर्यः, इति प्रतापवती एषा; अथ अन्नं, आपः, चन्द्रमाः, इति आप्यायनवती एषा; अथ बुद्धिः, मनः, अहंकारः, इति चेतनवती एषा; अथ प्राणः, अपानः, व्यानः इति प्राणवती एषा; इति एतत् वै ओँ इति उक्तेन एताः प्रस्तुताः अर्चिताः अर्पिताः भवन्ति, इति एवं हि आह।

एतद् वै सत्यकाम परं च अपरं च ब्रह्म यत् ओँ इति एतत् अक्षरं इति ॥५॥

अथ व्याहृतं१ँ वाऽइदमासीत्स सत्यं प्रजापतिस्तपस्तप्त्वाऽनुव्याहरद्भूर्भुवः३स्वरित्ये-
षैवाऽस्य प्रजापतेः स्थविष्ठा तनूर्या लोकवतीति स्वरित्यस्याः शिरो नाभिर्भुवो भूः पादाऽ
आदित्यश्चक्षुश्चक्षुषाऽऽयत्ता हि पुरुषस्य महतीर्मात्राश्चक्षुषा ह्ययं मात्राश्चरति सत्य१ँ वै
चक्षुरक्षिण्यवस्थितो हि पुरुषः सर्वार्थेषु चरत्येतस्माद्भूर्भुवः३स्वरित्युपासीतानेन हि प्रजा-
पतिर्विश्वात्मा विश्वचक्षुरिवोपासीतो भवतीत्येव१ँ ह्याहैषा वै प्रजापतेर्विश्वभृत्तनूरेतस्या-
मिद१ँ सर्वमन्तर्हितमस्मि१ँश्च सर्वस्मिन्नेषाऽन्तर्हितेति तस्मादेषोपासीतेति ॥६॥

तत्सवितुर्वरेण्यमित्यसौ वाऽआदित्यः सविता स वाऽएवं प्रवरणीयऽआत्मकामेनेत्याहु-
र्ब्रह्मवादिनोऽथ भर्गो देवस्य धीमहीति सविता वै देवस्ततो योऽस्य भर्गाख्यस्तं चिन्तयामी-
त्याहुर्ब्रह्मवादिनोऽथ धियो यो नः प्रचोदयादिति बुद्धयो वै धियस्ता योऽस्माकं प्रचोदयादि-
त्याहुर्ब्रह्मवादिनोऽथ भर्गऽइति यो ह वाऽअमुष्मिन्नादित्ये निहितस्तारकोऽक्षिणि वैष भर्गाख्यो
भाभिर्गतिरस्य हीति भर्गो भर्जयतीति वैष भर्गऽइति रुद्रो ब्रह्मवादिनोऽथ भऽइति भासय-
तीमाँल्लोकान्रऽइति रञ्जयतीमानि भूतानि गऽइति गच्छन्त्यस्मिन्नागच्छन्त्यस्मादिमाः प्रजा-
स्तस्माद्भरगत्वाद्भर्गः शश्वत्सूयमानात्सूर्यः सवनात्सविताऽऽदानादादित्यः पवनात्पावनोऽ-
थापोऽप्यायनादित्येव१ँ ह्याह खल्वात्मनऽआत्मानेताऽमृताख्यश्चेता मन्ता गन्तोत्स्रष्टाऽऽ-
नन्दयिता कर्ता वक्ता रसयिताऽऽघ्राता द्रष्टा श्रोता स्पृशति च विभुर्विग्रहे सन्निविष्टऽइत्ये-
व१ँ ह्याहाथ यत्र द्वैतीभूत१ँ विज्ञानं तत्र हि शृणोति पश्यति जिघ्रति रसयते चैव स्पर्शयति

अथ व्याहृतं वै इदं आसीत्, सः सत्यं प्रजापतिः तपः तप्त्वा अनुव्याहरत्, भूः भुवः स्वः इति, एषा एव अस्य प्रजापतेः स्थविष्ठा तनूः, या लोकवती इति, स्वः इति अस्याः शिरः, नाभिः भुवः, भूः पादौ । आदित्यः चक्षुः, चक्षुषा आयत्ता हि पुरुषस्य महतीः मात्राः, चक्षुषा हि अयं मात्राः चरति, सत्यं वै चक्षुः, अक्षिणि अवस्थितः हि पुरुषः, सर्वार्थेषु चरति । एतस्मात् भूः, भुवः, स्वः, इति उपासीत । अनेन हि प्रजापतिः विश्वात्मा विश्वचक्षुः इव उपासीतः भवति, इति एवं हि आह ।

एषा वै प्रजापतेः विश्वभृत् तनूः, एतस्यां इदं सर्वं अन्तर्हितं, अस्मिन् च सर्वस्मिन् एषा अन्त-र्हिता, इति, तस्मात् एषा उपासीत इति ॥६॥

×'तत् सवितुः वरेण्यं' इति असौ वै आदित्यः सविता, सः वै एवं प्रवरणीयः आत्मकामेन, इति आहुः ब्रह्मवादिनः ।

अथ 'भर्गः देवस्य धीमहि' इति, सविता वै देवः, ततः यः अस्य भर्गाख्यः, तं चिन्तयामि, इति आहु, ब्रह्मवादिनः ।

अथ 'धियः यः नः प्रचोदयात्' इति, बुद्धयः वै धियः ताः यः अस्माकं प्रचोदयात्, इति आहुः ब्रह्मवादिनः ।

अथ भर्गः इति, यः ह वै अमुष्मिन् आदित्ये निहितः, तारकः अक्षिणि वा एषः भर्गाख्यः, 'भाभिः गतिः अस्य' हि इति भर्गः, भर्जयति इति वा एषः भर्ग इति रुद्रः, ब्रह्मवादिनः । अथ 'भः' इति भासयति इमान् लोकान्, 'रः' इति रञ्जयति इमानि भूतानि, 'गः' इति गच्छन्ति अस्मिन् आगच्छन्ति अस्मात् इमाः प्रजाः, तस्मात् भ-र-ग-त्वात् भर्गः । शश्वत् सूयमानात् सूर्यः, सवनात् सविता, आदानात् आदित्यः, पवनात् पावनः, अथ आपः आप्यायनात्, इति एवं हि आह, खलु आत्मनः आत्मा नेता, अमृताख्यः चेता मन्ता, गन्ता, उत्स्रष्टा, आनंदयिता, कर्ता, वक्ता, रसयिता, आघ्राता, द्रष्टा, श्रोता, स्पृशति च विभुः, विग्रहे सन्निविष्टः इति, एवं हि आह । अथ यत्र द्वैतीभूतं विज्ञानं तत्र हि शृणोति, पश्यति, जिघ्रति, रसयते च एव, स्पर्शयति,

× ऋ० ३।६२।१०; साम० १४६२; वा०य० ३।३५; २२।९; ३०।२; ३६।३; तै०सं० १।५।६।४

सर्वमात्मा जानीतेति यत्राद्वैतीभूतꣳ विज्ञानं कार्यकारणकर्म्मनिर्मुक्तं निर्वचनमनौपम्यं निरूपाख्यं किं तदवाच्यम् ॥७॥

एष हि खल्वात्मेशानः शम्भुर्भवो रुद्रः प्रजापतिर्विश्वसृग्घिरण्यगर्भः सत्यं प्राणो हꣳसः शास्ता विष्णुर्नारायणोऽर्कः सविता धाता विधाता सम्राडिन्द्रऽइन्दुरिति यऽएष तपत्यग्निरिवाग्निना पिहितः सहस्राक्षेण हिरण्मयेनाण्डेनैष वाव जिज्ञासितव्योऽन्वेष्टव्यः सर्वभूतेभ्योऽभयं दत्वाऽरण्यं गत्वाऽथ बहिः कृत्वेन्द्रियार्थान्स्वाच्छरीरादुपलभेतेनमिति ॥

विश्वरूपꣳ हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम् ॥
सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॥८॥

+ तस्माद्वाऽएषऽउभयात्मैवꣳ विदात्मन्येवाभिध्यायत्यात्मन्येव यजतीति ध्यानं प्रयोगस्थं मनो विद्वदभिष्टुतं मनः पूतिमुच्छिष्टोपहतमित्यनेन तत्पावयेत् ॥ उच्छिष्टोच्छिष्टोपहतꣳ यच्च पापेन दत्तमृतसूतकाद्वा ॥ वसोः पवित्रमग्निः सवितुश्च रश्मयः पुनन्त्वन्नं मम दुष्कृतं च यदन्यत् ॥ अद्भिः पुरस्तात्परिदधाति प्राणाय स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा समानाय स्वाहोदानाय स्वाहेति पञ्चभिरभिजुहोत्यथावशिष्टꣳ यतवागश्नात्यथोऽद्भिर्भूयऽएवोपरिष्टात्परिदधात्याचान्तो भूत्वाऽऽत्मेज्यानः प्राणोऽग्निर्विश्वोऽसीति च द्वाभ्यामात्मानमभिध्यायेत्प्राणोऽग्निः परमात्मा वै पञ्च वायुः समाश्रितः ॥ स प्रीतः प्रीणातु विश्वꣳ विश्वभुग्विश्वोऽसि

सर्वं आत्मा जानीत इति । यत्र अद्वैतीभूतं विज्ञानं, कार्य-कारण-कर्म-निर्मुक्तं, निर्वचनं, अनौपम्यं निरूपाख्यं, किं, तत् ? अवाच्यम् ॥७॥

एषः हि खलु आत्मा, ईशानः, शम्भुः, भवः, रुद्रः, प्रजापतिः, विश्वसृक्, हिरण्यगर्भः, सत्यं, प्राणः, हंसः शास्ता, विष्णुः, नारायणः, अर्कः, सविता, धाता, विधाता, सम्राट्, इन्द्रः, इन्दुः इति । यः एषः तपति, अग्निः इव अग्निना पिहितः, सहस्राक्षेण हिरण्मयेन अण्डेन, एषः वाव जिज्ञासितव्यः, अन्वेष्टव्यः, सर्वभूतेभ्यः अभयं दत्वा, अरण्यं गत्वा, अथ बहिः कृत्वा इन्द्रियार्थान्, स्वात् शरीरात् उपलभेत एनं, इति ।

विश्वरूपं, हरिणं, जातवेदसं, परायणं, ज्योतिः,
एकं तपन्तम् । सहस्ररश्मिः शतधा वर्तमानः
प्राणः प्रजानां उदयति एषः सूर्य ॥८॥*

तस्मात् वै एषः उभयात्मा, एवंवित्, आत्मनि एव अभिध्यायति, आत्मनि एव यजति इति, ध्यानं प्रयोगस्थं मनः विद्वत्-अभिष्टुतं, मनः पूतिं उच्छिष्टोपहतं, इति अनेन तत् पावयेत् ।

उच्छिष्टोच्छिष्टोपहतं, यत् च पापेन दत्त-मृत-सूतकात् वा ॥

वसोः पवित्रं अग्निः सवितुः च रश्मयः पुनन्तु, अन्नं मम दुष्कृतं च यत् अन्यत् ॥

अद्भिः पुरस्तात् परिदधाति । प्राणाय स्वाहा, अपानाय स्वाहा, व्यानाय स्वाहा, समानाय स्वाहा, उदानाय स्वाहा, इति पञ्चभिः अभिजुहोति, यथा अवशिष्टं यतवाक् अश्नाति, अथ अद्भिः भूय एव उपरिष्टात् परिदधाति, आचान्तः भूत्वा, आत्मेज्यानः, प्राणः अग्निः विश्वः असि, इति च द्वाभ्यां आत्मानं अभिध्यायेत् ।

प्राणः अग्निः, परमात्मा वै पञ्च वायुः समाश्रितः, सः प्रीतः प्रीणातु विश्वं, विश्वभुक् विश्वः असि ।

+ इत आरभ्यासमाप्तेः पाठो मुंबईस्थनिर्णयसागरमुद्रणालयमुद्रितपुस्तके नास्त्येवेति ॥ * प्रश्न उ० १।८

वैश्वानरोऽसि विश्वं त्वया धार्यते जायमानम्॥ विशन्तु त्वामाहुतयश्च सर्वाः प्रजास्तत्र यत्र विश्वामृतोऽसीत्येवन्न विधिना खल्वनेनात्ताऽन्नत्वं पुनरुपैति ॥९॥

अथापरꣳ वेदितव्यमुत्तरो विकारोऽस्यात्मयज्ञस्य यथाऽन्नमन्नादश्चेत्यस्योपव्याख्यानं पुरुषश्चेता प्रधानान्तस्थः सऽएव भोक्ता प्राकृतमन्नं भुङ्क्तऽइति तस्यायं भूतात्मा ह्यन्नमस्य कर्ता प्रधानस्तस्मात्त्रिगुणं भोज्यं भोक्ता पुरुषोऽन्तस्थोऽत्र दृष्टं नाम प्रत्ययꣳ यस्माद्बीजसम्भवा हि पशवस्तस्माद्बीजं भोज्यमनेनैव प्रधानस्य भोज्यत्वꣳ व्याख्यातं तस्माद्भोक्ता पुरुषो भोज्या प्रकृतिस्तत्स्थो भुङ्क्तऽइति प्राकृतमन्नं त्रिगुणभेदपरिणामत्वान्महदाद्यꣳ विशेषान्तं लिङ्गमनेनैव चतुर्दशविधस्य मार्गस्य व्याख्या कृता भवति सुखदुःखमोहसंज्ञꣳ ह्यन्नभूतमिदं जगत् ॥ न हि बीजस्य स्वादुपरिग्रहोऽस्तीति यावन्न प्रसूतिः ॥ तस्याप्येवं तिसृष्ववस्थास्वन्नत्वं भवति कौमारꣳ यौवनं जरा परिणामत्वात्तदन्नत्वमेवं प्रधानस्य व्यक्ततां गतस्योपलब्धिर्भवति तत्र बुद्ध्यादीनि स्वादूनि भवन्त्यध्यवसायसङ्कल्पाभिमानाऽइत्यर्थेन्द्रियार्थान्पञ्च स्वादूनि भवन्त्येवꣳ सर्वाणीन्द्रियकर्म्माणि प्राणकर्म्माण्येवꣳ व्यक्तमन्नमव्यक्तमन्नमस्य निर्गुणो भोक्ता भोक्तृत्वाच्चैतन्यं प्रसिद्धं तस्य यथाऽग्निर्वै देवानामन्नादः सोमोऽन्नमग्निनैवान्नमित्येवꣳ वित्सोमसंज्ञोऽयं भूतात्माऽग्निसंज्ञोऽप्यव्यक्तमुखऽइति वचनात्पुरुषो ह्यव्यक्तमुखेन त्रिगुणं भुङ्क्तऽइति यो हैवꣳ वेद सन्न्यासी योगी चात्मयाजी चेत्यथ यद्वाऽन्यः कश्चिच्छून्यागारे कामिन्यः प्रविष्टाः स्पृशतीन्द्रियार्थाꣳस्तद्वद्यो न स्पृशति प्रविष्टान्सन्न्यासी योगी चात्मयाजी चेति ॥१०॥

वैश्वानरः असि, विश्वं त्वया धार्यते जायमानम् ॥ विशन्तु त्वां आहुतयः च सर्वाः प्रजाः तत्र यत्र विश्वामृतः असि, इति एवं न विधिना खलु अनेन अत्ता अन्नत्वं पुनः उपैति ॥९॥

अथ अपरं वेदितव्यं, उत्तरः विकारः अस्य आत्म-यज्ञस्य, यथा अन्नं अन्नादः च इति अस्य उपव्याख्यानम्, पुरुषः चेता प्रधानान्तस्थः, सः एव भोक्ता, प्राकृतं अन्नं भुंक्ते इति। तस्य अयं भूतात्मा हि अन्नं, अस्य कर्ता, प्रधानः, तस्मात् त्रिगुणं भोज्यं, भोक्ता पुरुषः अन्तस्थः, अत्र दृष्टं नाम प्रत्ययं, यस्मात् बीजसम्भवाः हि पशवः, तस्मात् बीजं भोज्यं, अनेन एव प्रधानस्य भोज्यत्वं व्याख्यातं, तस्मात् भोक्ता पुरुषः, भोज्या प्रकृतिः, तत्स्थः भुंक्ते इति। प्राकृतं अन्नं त्रिगुण-भेद-परिणामत्वात् महदाद्यं विशेषान्तं लिङ्गं, अनेनैव चतुर्दश--विधस्य मार्गस्य व्याख्या कृता भवति। सुख--दुख--मोह--संज्ञं हि अन्नभूतं इदं जगत्। नहि बीजस्य स्वादुपरिग्रहः अस्ति इति। यावत् न प्रसूतिः ॥ तस्य अपि एवं तिसृषु अवस्थासु अन्नत्वं भवति, कौमारं यौवनं जरा, परिणामत्वात् तत् अन्नत्वं एव प्रधानस्य व्यक्ततां गतस्य उपलब्धिः भवति। तत्र बुध्यादीनि स्वादूनि भवन्ति, अध्यवसाय-संकल्पाभिमानाः इति। अथ इन्द्रियार्थान् पञ्च स्वादूनि भवन्ति, एवं सर्वाणि इन्द्रियकर्माणि, प्राण-कर्माणि, एवं व्यक्तं अन्नं-अव्यक्तं अन्नं, अस्य निर्गुणः भोक्ता, भोक्तृत्वात्, चैतन्यं प्रसिद्धं, तस्य यथा अग्निः वै देवानां अन्नादः, सोमः अन्नं, अग्निना एव अन्नं इति एवंवित् सोमसंज्ञः अयं भूतात्मा अग्निसंज्ञः अपि अव्यक्तमुखः इति वचनात्, पुरुषः हि अव्यक्तमुखेन त्रिगुणं भुङ्क्ते, इति। यः ह एवं वेद, संन्यासी योगी च, आत्मयाजी च, इति। अथ यत् वा अन्यः कश्चित् शून्यागारे, कामिन्यः प्रविष्टाः स्पृशति इन्द्रियार्थान्, तद्वत् यः न स्पृशति, प्रविष्टान्, संन्यासी योगी च आत्मयाजी च इति ॥१०॥

परꣳ वाऽएतदात्मनो रूपꣳ यदन्नमन्नमयो ह्ययं प्राणोऽथ नयद्यश्नात्यमन्ताऽश्रोताऽस्प्रष्टाऽद्रष्टाऽवक्ताऽघ्राताऽरसयिता भवति प्राणाꣳश्चोत्सृजतीत्येवꣳ ह्याहाथ यदि खल्वश्नाति प्राणसमृद्धो भूत्वा मन्ता भवति श्रोता भवति स्प्रष्टा भवति वक्ता भवति रसयिता भवति घ्राता भवति द्रष्टा भवतीत्येवꣳ ह्याह ॥

अन्नाद्वै प्रजाः प्रजायन्ते याः काश्चित्पृथिवीश्रिताः ।
अतोऽन्नेनैव जीवन्त्यथैतदपि यन्त्यन्ततः ॥११॥

अथान्यत्राप्युक्तꣳ सर्वाणि ह वाऽइमानि भूतान्यहरहः प्रपतन्त्यन्नमभिजिघृक्षमाणानि सूर्यो रश्मिभिरादत्यन्नं तेनासौ तपत्यन्नेनाभिषिक्ताः पचन्तीमे प्राणाऽअग्निर्वाऽअन्नेनोज्ज्वलत्यन्नकामेनेदं प्रकल्पितं ब्रह्मणाऽतोऽन्नमात्मेत्युपासीतेत्येवꣳ ह्याह ॥

अन्नाद्भूतानि जायन्ते जातान्यन्नेन वर्द्धन्ते ।
अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यते ॥१२॥

अथान्यत्राप्युक्तꣳ विश्वभृद्वै नामैषा तनूर्भगवतो विष्णोर्यदिदमन्नं प्राणो वाऽअन्नस्य रसो मनः प्राणस्य विज्ञानं मनसऽआनन्दꣳ विज्ञानस्येत्यन्नवान्प्राणवान्मनस्वान्विज्ञानवानानन्दवाꣳश्च भवति यो हैवꣳ वेद यावन्ति ह वै भूतान्यन्नमदन्ति तावत्स्वन्तरस्थोऽन्नमत्ति यो हैवꣳ वेद ॥ अन्नमेवविजरन्नमन्नꣳ सꣳवननꣳ स्मृतमन्नं पशूनां प्राणोऽन्नं ज्येष्ठमन्नं भिषक्स्मृतम् ॥१३॥

परं वा एतद् आत्मनः रूपं यत् अन्नं, अन्नमयः हि अयं प्राणः; अथ न यदि अश्नाति, अमन्ता, अश्रोता, अस्प्रष्टा, अद्रष्टा, अवक्ता, अघ्राता, अरसयिता भवति, प्राणान् च उत्सृजति, इति एवं हि आह । अथ यदि खलु अश्नाति, प्राणसमृद्धः भूत्वा, मन्ता भवति, श्रोता भवति, स्प्रष्टा भवति, वक्ता भवति, रसयिता भवति, घ्राता भवति, द्रष्टा भवति, इति एवं हि आह ॥

अन्नात् वै प्रजाः प्रजायन्ते, याः काश्चित् पृथिवीश्रिताः । अतः अन्नेन एव जीवन्ति, अथ एतत् अपि यन्ति अन्ततः ॥११॥ ❀

अथ अन्यत्र अपि उक्तम् ।

सर्वाणि ह वै इमानि भूतानि अहरहः प्रपतन्ति; अन्नं अभिजिघृक्षमाणानि, सूर्यः रश्मिभिः आददाति अन्नं, तेन असौ तपति, अन्नेन अभिषिक्ताः पचन्ति इमे प्राणाः, अग्निः वा अन्नेन उज्ज्वलति, अन्न-कामेन इदं प्रकल्पितं ब्रह्मणा, अतः अन्नं आत्मा इति उपासीत, इति एवं हि आह ।

अन्नात् भूतानि जायन्ते, जातानि अन्नेन वर्द्धन्ते । अद्यते अत्ति च भूतानि, तस्मात् अन्नं तत् उच्यते ॥१२॥ +

अथ अन्यत्र अपि उक्तम् ।

विश्वभृत् वै नाम एषा तनूः भगवतः विष्णोः, यत् इदं अन्नं, प्राणः वै अन्नस्य रसः, मनः प्राणस्य, विज्ञानं मनसः, आनन्दं विज्ञानस्य, इति अन्नवान्, प्राणवान्, मनस्वान्, विज्ञानवान्, आनन्दवान् च भवति, यः ह एवं वेद, यावन्ति ह वै भूतानि अन्नं अदन्ति, तावत्सु अन्तरस्थः अन्नं अत्ति, यः ह एवं वेद॥ अन्नं एव विजरन्नं, अन्नं संवननं स्मृतं, अन्नं पशूनां प्राणः, अन्नं ज्येष्ठं, अन्नं भिषक् स्मृतम् ॥१३॥

❀ तै० उ० २।२।१

अथान्यत्राप्युक्तमन्नꣳ वाऽअस्य सर्वस्य योनिः ॥ कालश्चान्नस्य सूर्यो योनिर्वै कालस्य तस्यैतद्रूपꣳ यन्निमेषादिकालात्सम्भृतं द्वादशात्मकꣳ वत्सरमेतस्याग्नेयमर्द्धमर्द्धꣳ वारुणं मघाद्यꣳ श्रविष्ठार्द्धमाग्नेयं क्रमेणोत्क्रमेण सार्पाद्यꣳ श्रविष्ठार्द्धान्तꣳ सौम्यं तत्रैकैकमात्मनो नवाꣳशकꣳ सचारकविधꣳ सौक्ष्म्यत्वादेतत्प्रमाणमनेनैव प्रमीयते हि कालो न विना प्रमाणयेत्प्रमाणेन प्रमेयस्योपलब्धिः प्रमेयोऽपि प्रमाणतां पृथक्त्वादुपैत्यात्मसम्बोधनार्थमित्येवꣳ ह्याह ॥ यावत्यो वै कालस्य कलास्तावतीषु चरत्यसौ यः कालं ब्रह्मेत्युपासीत कालस्तस्यातिदूरमपसरतीत्येवꣳ ह्याह ॥

कालात्स्रवन्ति भूतानि कालाद्वृद्धिं प्रयान्ति च ॥
काले चास्तं नियच्छन्ति कालो मूर्तिरमूर्तिमान् ॥१४॥

द्वे वाव ब्रह्मणो रूपे कालश्चाकालश्चाथ यः प्रागादित्यात्सोऽकालोऽकलोऽथ यऽआदित्याद्यः स कालः सकलः सकलस्य वाऽएतद्रूपꣳ यत्सꣳवत्सरः सꣳवत्सरात्खल्वेवेमाः प्रजाः प्रजायन्ते सꣳवत्सरेणेह वै जाता विवर्द्धन्ते सꣳवत्सरे प्रत्यस्तꣳ यन्ति तस्मात्सꣳवत्सरो वै प्रजापतिः कालोऽन्नं ब्रह्मनीडमात्मा चेत्येवꣳ ह्याह ॥

कालः पचति भूतानि सर्वाण्येव महात्मनि ॥
यस्मिꣳस्तु पच्यते कालो यस्तꣳ वेद स वेदवित् ॥१५॥

विग्रहवानेष कालः सिन्धुराजः प्रजानाम् ॥ एष तत्स्थः सविताख्यो यस्मादेवेमे चन्द्रर्क्षग्रहसꣳवत्सरादयः सूयन्तेऽथैभ्यः सर्वमिदमत्र वा यत्किञ्चिच्छुभाशुभम् ॥

अथ अन्यत्र अपि उक्तम्—

अन्नं वै अस्य सर्वस्य योनिः। कालः च अन्नस्य, सूर्यः योनिः वै कालस्य, तस्य एतद् रूपं, यत् निमेषादिकालात् सम्भृतं, द्वादशात्मकं वत्सरं, एतस्य आग्नेयं अर्द्धं, अर्द्धं वारुणं मघाद्यं श्रविष्ठार्द्धं आग्नेयं, क्रमेण उत्क्रमेण सार्पाद्यं श्रविष्ठार्द्धान्तं सौम्यं, तत्र एकैकं आत्मनः नवांशकं सचारकाविधं सौक्ष्म्यत्वात् एतत् प्रमाणं, अनेन एव प्रमीयते हि कालः न विना [1]प्रमाणयेत् प्रमाणेन प्रमेयस्य उपलब्धिः प्रमेयः अपि प्रमाणतां पृथक्त्वात् उप एति आत्मसंबोधनार्थं इति एवं हि आह ॥

यावत्यः वै कालस्य कलाः तावतीषु चरति असौ यः कालं ब्रह्म इति उपासीत, कालः तस्य अतिदूरं अपसरति इति एवं हि आह ॥

कालात् स्रवन्ति भूतानि कालात् वृद्धिं प्रयान्ति च ॥ काले च अस्तं नियच्छन्ति कालः मूर्तिः अमूर्तिमान् ॥१४॥

द्वे वाव ब्रह्मणः रूपे कालः च अकालः च, अथ यः प्राक् आदित्यात् सः अकालः अकलः, अथ यः आदित्यात् यः सः कालः सकलः, सकलस्य वै एतद् रूपं यत् संवत्सरः, संवत्सरात् खलु एव इमाः प्रजाः प्रजायन्ते, संवत्सरेण इह वै जाता विवर्द्धन्ते, संवत्सरे प्रति अस्तं यन्ति, तस्मात् संवत्सरः वै प्रजापतिः कालः, अन्नं ब्रह्मनीडं आत्मा च इति एवं हि आह ॥

कालः पचति भूतानि सर्वाणि एव महात्मनि ।
यस्मिन् तु पच्यते कालः यः तं वेद सः वेदवित् ॥१५॥

विग्रहवान् एषः कालः सिन्धुराजः प्रजानाम् ॥ एषः तत्स्थः सविताख्यः यस्मात् एव इमे चन्द्र-ऋक्ष-ग्रह-संवत्सरादयः सूयन्ते, अथ एभ्यः सर्वं इदं अत्र वा यत्किंचित् शुभाशुभम् ॥

---

१ 'प्रमाणयेत्' इत्येतत्पदं–आनंदाश्रममुद्रित पुस्तके नास्ति ।

दृश्यते ह लोके तदेतेभ्यस्तस्मादादित्यात्मा ब्रह्माथ कालसंज्ञमादित्यमुपासीतादित्यो ब्रह्मेत्ये-केऽथऽएवꣳ ह्याह ॥

होता भोक्ता हविर्मन्त्रो यज्ञो विष्णुः प्रजापतिः ॥
सर्वः कश्चित्प्रभुः साक्षी योऽमुष्मिन्भाति मण्डले ॥१६॥

ब्रह्म ह वाऽइदमग्रऽआसीदेकोऽनन्तः प्रागनन्तो दक्षिणतोऽनन्तः प्रतीच्योऽनन्तऽउदीच्यो-ऽनन्तऽऊर्ध्वञ्चावाङ् च सर्वतोऽनन्तो न ह्यस्य प्राच्यादिदिशः कल्पन्तेऽथ तिर्यगवाङ् चोर्ध्वꣳ वानूह्यऽएष परमात्माऽपरिमितो योऽजोऽतर्क्योऽचिन्त्यऽएषऽआकाशात्मैवैष कृत्स्नक्षयऽएको जागर्तीत्येतस्मादाकाशादेष खल्विदं चेतामात्रं बोधयत्यनेनैव चेदं ध्यायतेऽस्मिꣳश्च प्रत्यस्तꣳ यात्यस्यैतद्भास्वरꣳ रूपꣳ यदमुष्मिन्नादित्ये तपत्यग्नौ चाधूमके यज्ज्योतिश्चित्रतर-मुदरस्थोऽथ वा यः पचत्यन्नमित्येवꣳ ह्याह ॥ यश्चैषोऽग्नौ यश्चायꣳ हृदये यश्चासावादित्ये सऽएषऽएकऽइत्येकस्य हैकत्वमेति यऽएवꣳ वेद ॥१७॥

तथा तत्प्रयोगकल्पः प्राणायामः प्रत्याहारो ध्यानं धारणा तर्कः समाधिः षडङ्गऽइत्युच्यते योगोऽनेन यदा पश्यन्पश्यति रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं तदा विद्वान्पुण्यपापे× विहाय परेऽव्यये सर्वमेकीकरोतीत्येवꣳ ह्याह ॥

यथा पर्वतमादीप्तं नाश्रयन्ति मृगा द्विजाः ॥
तद्वद् ब्रह्मविदो दोषा नाश्रयन्ति कदाचन ॥१८॥

दृश्यते ह लोके तत् एतेभ्यः, तस्मात् आदित्यात्मा ब्रह्म, अथ कालसंज्ञं आदित्यं उपासीत, आदित्यः ब्रह्म इति एके, अथ एवं हि आह ॥

होता भोक्ता हविः मन्त्रः यज्ञः विष्णुः प्रजापतिः ॥ सर्वः कः चित् प्रभुः साक्षी यः अमुष्मिन् भाति मण्डले ॥१६॥

ब्रह्म ह वै इदं अग्रे आसीत्, एकः अनन्तः प्राक् अनन्तः दक्षिणतः अनन्तः प्रतीच्यः अनन्तः उदीच्यः अनन्तः ऊर्ध्वं च अवाङ् च सर्वतो अनन्तः, न हि अस्य प्राच्यादिदिशः कल्पन्ते, अथ तिर्यक् अवाङ् च ऊर्ध्वं वा अनूह्यः एषः परमात्मा अपरिमितः यः अजः अतर्क्यः अचिन्त्यः एषः आकाशात्मा एव एषः कृत्स्नक्षयः एकः जागर्ति इति, एतस्मात् आकाशात् एषः खलु इदं चेतामात्रं बोधयति अनेन एव च इदं ध्यायते अस्मिन् च प्रति अस्तं याति, अस्य एतद् भास्वरं रूपं यद् अमुष्मिन् आदित्ये तपति अग्नौ च अधूमके यद् ज्योतिः चित्रतरं उदरस्थः अथ वा यः पचति अन्नं इति एवं हि आह ॥

यः च एषः अग्नौ यः च अयं हृदये यः च असौ आदित्ये सः एषः एकः इति, एकस्य ह एकत्वं एति यः एवं वेद॥१७॥

तथा तत्प्रयोगकल्पः प्राणायामः प्रत्याहारः ध्यानं धारणा तर्कः समाधिः षडङ्गः इति उच्यते योगः, अनेन यदा पश्यन् पश्यति रुक्मवर्णं कर्तारं ईशं पुरुषं ब्रह्मयोनिं तदा विद्वान् पुण्यपापे विहाय परे अव्यये सर्वं एकीकरोति इति, एवं हि आह ॥

यथा पर्वतं आदीप्तं न आश्रयन्ति मृगाः द्विजाः ।
तद्वत् ब्रह्मविदः दोषाः न आश्रयन्ति कदाचन॥१८॥

× यदा पश्यः पश्यते...।... पापे विधूय निरञ्जनः परमं साम्यमुपैति । [मुण्ड० उ० ३।१।३]

अथान्यत्राप्युक्तꣳ यदा वै बहिर्विद्वान्मनो नियम्येन्द्रियार्थाꣳश्च प्राणो निवेशयित्वा निःसंकल्पस्ततस्तिष्ठेदप्राणादिह यस्मात्सम्भूतः प्राणसंज्ञको जीवस्तस्मात्प्राणो वै तुरीयाख्ये धारयेत्प्राणमित्येवꣳ ह्याह ॥

अचित्तं चित्तमध्यस्थमचिन्त्यं गुह्यमुत्तमम् ॥
तत्र चित्तं निधायेत तच्च लिङ्गं निराश्रयम् ॥१९॥

अथान्यत्राप्युक्तमतः पराऽस्य धारणा तालुरसनाग्रनिपीडनाद्वाङ्मनःप्राणनिरोधनाद् ब्रह्म तर्केण पश्यति यदाऽऽत्मनाऽऽत्मानमणोरणीयाꣳसं द्योतमानं मनःक्षयात्पश्यति तदाऽऽत्मनाऽऽत्मानं दृष्ट्वा निरात्मा भवति निरात्मकत्वादसंख्योऽयोनिश्चित्यो मोक्षलक्षणऽइत्येतत्परꣳ रहस्यमित्येवꣳ ह्याह ॥

चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभम् ॥
प्रसन्नात्माऽऽत्मनि स्थित्वा सुखमव्ययमश्नुतऽइति ॥२०॥

अथान्यत्राप्युक्तमूर्ध्वगा नाडी सुषुम्णाख्या प्राणसञ्चारिणी तालवन्तर्विच्छिन्ना तया प्राणोङ्कारमनोयुक्तयोर्ध्वमुत्क्रमेत्तालवध्यग्रं परिवर्त्य चेन्द्रियाण्यसꣳयोज्य महिमा महिमानं निरीक्षेत ततो निरात्मकत्वमेति निरात्मकत्वान्न सुखदुःखभाग्भवति केवलत्वं लभतऽइत्येवꣳ ह्याह ॥

परः पूर्वं प्रतिष्ठाप्य निगृहीतानिलं ततः ॥
तीर्त्वा पारमपारेण पश्चाद्युञ्जीत मूर्द्धनि ॥२१॥

अथ अन्यत्र अपि उक्तम्—

यदा वै बहिः विद्वान् मनः नियम्य इन्द्रियार्थान् च प्राणः निवेशयित्वा निःसंकल्पः ततः तिष्ठेत् आप्राणात् इह यस्मात् सम्भूतः प्राणसंज्ञकः जीवः तस्मात् प्राणः वै तुरीयाख्ये धारयेत् प्राणं इति एवं हि आह ॥

अचित्तं चित्तमध्यस्थं अचिन्त्यं गुह्यं उत्तमम् ।
तत्र चित्तं निधायेत तत् च लिङ्गं निराश्रयम् ॥१९॥

अथ अन्यत्र अपि उक्तम्—

अतः परा अस्य धारणा तालुरसना अग्रनिपीडनाद् वाक्-मनः-प्राण-निरोधनाद् ब्रह्म तर्केण पश्यति यदा आत्मना आत्मानं अणोः अणीयांसं द्योतमानं मनःक्षयात् पश्यति, तदा आत्मना आत्मानं दृष्ट्वा निरात्मा भवति, निरात्मकत्वात् असंख्यः अयोनिः चिन्त्यः मोक्षलक्षणः इति एतत् परं रहस्यं इति एवं हि आह ॥

चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभम् ।
प्रसन्नात्मा आत्मनि स्थित्वा सुखं अव्ययं अश्नुते इति ॥२०॥

अथ अन्यत्र अपि उक्तम्—

ऊर्ध्वगा नाडी सुषुम्णाख्या प्राणसंचारिणी तालवन्तर्विच्छिन्ना तया प्राणोङ्कारमनोयुक्तया ऊर्ध्वं उत्क्रमेत् तालवध्यग्रं परिवर्त्य च इन्द्रियाणि असंयोज्य महिमा महिमानं निरीक्षेत ततः निरात्मकत्वं एति, निरात्मकत्वात् न सुखदुःखभाक् भवति केवलत्वं लभते, इति एवं हि आह ॥

परः पूर्वं प्रतिष्ठाप्य निगृहीतानिलं ततः ।
तीर्त्वा पारं अपारेण पश्चाद् युञ्जीत मूर्द्धनि॥ २१

अथान्यत्राप्युक्तं द्वे वाव ब्रह्मणीऽअभिध्येये शब्दश्चाशब्दश्चाथ शब्देनैवाशब्दमाविष्क्रियतेऽथ तत्रो३मिति शब्दोऽनेनोर्ध्वमुत्क्रान्तोऽशब्दे निधनमेत्यथ हैषा गतिरेतदमृतमेतत्सायुज्यत्वं निर्वृत्तत्वं तथा चेत्यथ यथोर्णनाभिस्तन्तुनोर्ध्वमुत्क्रान्तोऽवकाशं लभतऽइत्येवꣳ वाव खल्वसाऽअभिध्यातऽओ३मित्यनेनोर्ध्वमुत्क्रान्तः स्वातन्त्र्यं लभतेऽन्यथा परे शब्दवादिनः श्रवणाङ्गुष्ठयोगेनान्तर्हृदयाकाशशब्दमाकर्णयन्ति सप्तविधेयं तस्योपमा यथा नद्यः किङ्किणी काꣳस्यचक्रकभेकविष्क्रान्धिकावृष्टिर्निवाते वदतीति तं पृथग्लक्षणमतीत्य परेऽशब्देऽव्यक्ते ब्रह्मण्यस्तं गतास्तत्र तेऽपृथग्धर्मिणोऽपृथग्विवेक्या यथा सम्पन्ना मधुत्वं नानारसाऽइत्येवꣳ ह्याह ॥

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ॥
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥२२॥+

अथान्यत्राप्युक्तꣳ यः शब्दस्तदो३मित्येतदक्षरꣳ यदस्याग्रं तच्छान्तमशब्दमभयमशोकमानन्दं तृप्तꣳ स्थिरमचलममृतमच्युतं ध्रुवꣳ विष्णुसंज्ञितꣳ सर्वापरत्वाय तदेते उपासीतेत्येवꣳ ह्याह ॥

योऽसौ परापरो देवो ऽओꣳकारो नाम नामतः ॥
निःशब्दः शून्यभूतस्तु मूर्ध्नि स्थाने ततोऽभ्यसेत् ॥२३॥

अथान्यत्राप्युक्तं धनुः शरीरमो३मित्येतच्छरः शिखाऽस्य मनस्तमोलक्षणं भित्त्वा तमोऽतमाविष्टमागच्छत्यथाविष्टं भित्त्वाऽलातचक्रमिव स्फुरन्तमादित्यवर्णमूर्जस्वन्तं ब्रह्म तमसः

अथ अन्यत्र अपि उक्तम्—

द्वे वाव ब्रह्मणी अभिध्येये शब्दः च अशब्दः च, अथ शब्देन एव अशब्दं आविष्क्रियते, अथ तत्र ॐ इति शब्दः अनेन ऊर्ध्वं उत्क्रान्तः अशब्दे निधनं एति, अथ हि एषा गतिः एतद् अमृतं एतत् सायुज्यत्वं निर्वृत्तत्वं तथा च इति, अथ यथा ऊर्णनाभिः तन्तुना ऊर्ध्वं उत्क्रान्तः अवकाशं लभते इति एवं वाव खलु असौ अभिध्याता ॐ इति अनेन ऊर्ध्वं उत्क्रान्तः स्वातन्त्र्यं लभते, अन्यथा परे शब्दवादिनः श्रवणाङ्गुष्ठ--योगेन अन्तर्हृदयाकाशशब्दं आकर्णयन्ति, सप्तविधा इयं तस्य उपमा यथा नद्यः किङ्किणी काँस्य-चक्रक-भेक-विष्क्रान्धिकावृष्टिः निवाते वदति इति तं पृथक् लक्षणं अतीत्य परे अशब्दे अव्यक्ते ब्रह्मणि अस्तं गताः, तत्र ते अपृथक् धर्मिणः अपृथक् विवेक्याः यथा सम्पन्ना मधुत्वं नानारसाः इति एवं हि आह ॥

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्म अधिगच्छति ॥२२॥

अथ अन्यत्र अपि उक्तम्—

यः शब्दः तत् ॐ इति एतत् अक्षरं यत् अस्य अग्रं तत् शान्तं अशब्दं अभयं अशोकं आनन्दं तृप्तं स्थिरं अचलं अमृतं अच्युतं ध्रुवं विष्णुसंज्ञितं सर्वापरत्वाय तत् एते उपासीत, इति एवं हि आह ॥

यः असौ परापरः देवः ॐकारः नाम नामतः ।
निःशब्दः शून्यभूतः तु मूर्ध्नि स्थाने ततः अभ्यसेत् ॥२३॥

अथ अन्यत्र अपि उक्तम्—

धनुः शरीरं ॐ इति एतत् शरः शिखा अस्य मनः तमोलक्षणं भित्त्वा तमः अतमाविष्टं आगच्छति, अथ आविष्टं भित्त्वा अलातचक्रं इव स्फुरन्तं आदित्यवर्णं ऊर्जस्वन्तम् ब्रह्म तमसः

+ ब्रह्मबिन्दु उप० १७

पर्यपश्यद्यदमुष्मिन्नादित्येऽथ सोमेऽग्नौ विद्युति विभात्यथ खल्वेनं दृष्ट्वाऽमृतत्वं गच्छतीत्येवꣳ ह्याह ॥

ध्यानमन्तः परे तत्त्वे लक्ष्येषु च निधीयते
अतोऽविशेषविज्ञानꣳ विशेषमुपगच्छति ॥
मानसे च विलीने तु यत्सुखं चात्मसाक्षिकम् ॥
तद्ब्रह्म चामृतꣳ शुक्रꣳ सा गतिर्लोकऽएव सः ॥२४॥

अथान्यत्राप्युक्तं निद्रेवान्तर्हितेन्द्रियः शुद्धितमया धिया स्वप्नऽइव यः पश्यतीन्द्रियबिलेऽविवशः प्रणवाख्यं प्रणेतारं भारूपꣳ विगतनिद्रꣳ विजरꣳ विमृत्युꣳ विशोकं च सोऽपि प्रणवाख्यः प्रणेता भारूपो विगतनिद्रो विजरो विमृत्युर्विशोको भवतीत्येवꣳ ह्याह ॥

एवं प्राणमथोङ्कारꣳ यस्मात्सर्वमनेकधा ॥ युनक्ति युञ्जते वाऽपि तस्माद्योगऽइति स्मृतः ॥
एकत्वं प्राणमनसोरिन्द्रियाणां तथैव च ॥ सर्वभावपरित्यागो योगऽइत्यभिधीयते ॥२५॥

अथान्यत्राप्युक्तꣳ यथा चाप्सु चारिणः शाकुनिकः सूत्रयन्त्रेणोद्धृत्योदरेऽग्नौ जुहोत्येवꣳ वाव खल्विमान्प्राणानो३मित्यनेनोद्धृत्यानामयेऽग्नौ जुहोत्यतस्तप्तोर्वीव सोऽथ यथा तप्तोर्विसर्पिस्तृणकाष्ठसꣳस्पर्शेनोज्ज्वलतीत्येवꣳ वाव खल्वसाऽअप्राणाख्यः प्राणसꣳस्पर्शेनोज्ज्वलत्यथ यदुज्ज्वलत्येतद्ब्रह्मणो रूपं चैतद्विष्णोः परमं पदं चैतद्रुद्रस्य रुद्रत्वमेतत्तदपरिमितधा वाऽऽत्मानꣳ विभज्य पूरयतीमाँल्लोकानित्येवꣳ ह्याह ॥

वह्नेश्च यद्वत्खलु विष्फुलिङ्गाः सूर्यान्मयूखाश्च तथैव तस्य ॥
प्राणादयो वै पुनरेव तस्मादभ्युच्चरन्तीह यथा क्रमेण ॥२६॥

पर्यपश्यत् यत् अमुष्मिन् आदित्ये, अथ सोमे अग्नौ विद्युति विभाति अथ खलु एनं दृष्ट्वा अमृतत्वं गच्छति इति एवं हि आह

ध्यानं अन्तःपरे तत्त्वे लक्ष्येषु च निधीयते ।
अतः अविशेषविज्ञानं विशेषं उपगच्छति ॥
मानसे च विलीने तु यत् सुखं च आत्मसाक्षिकं ।
तद् ब्रह्म च अमृतं शुक्रं सा गतिः लोके एव सः ॥२४

अथ अन्यत्र अपि उक्तम्—

निद्रेव अन्तर्हितेन्द्रियः शुद्धितमया धिया स्वप्ने इव यः पश्यति इन्द्रियबिले अविवशः प्रणवाख्यं प्रणेतारं भारूपं विगतनिद्रं विजरं विमृत्युं विशोकं च सः अपि प्रणवाख्यः प्रणेता भारुपः विगतनिद्रः विजरः विमृत्युः विशोकः भवति इति एवं हि आह ॥

एवं प्राणं अथ ॐकारं यस्मात् सर्वं अनेकधा ।
युनक्ति युञ्जते वा अपि तस्मात् योगः इति स्मृतः ॥
एकत्वं प्राणमनसोः इंद्रियाणां तथा एव च ।
सर्वभावपरित्यागः योगः इति अभिधीयते ॥२५॥

अथ अन्यत्र अपि उक्तम्—

यथा च अप्सु चारिणः शाकुनिकः सूत्रयन्त्रेण उद्धृत्य उदरे अग्नौ जुहोति, एवं वाव खलु इमान् प्राणान् ॐ३ इति अनेन उद्धृत्य अनामये अग्नौ जुहोति, अतः तप्ता उर्वी-इव सः अथ यथा तप्तोर्विसर्पिः तृणकाष्ठसंस्पर्शेन उज्ज्वलति इति, एवं वाव खलु असौ अप्राणाख्यः प्राणसंस्पर्शेन उज्ज्वलति, इति एवं वाव खलु असौ अप्राणाख्यः प्राणसंस्पर्शेन उज्ज्वलति, अथ यत् उज्ज्वलति एतत् ब्रह्मणः रूपं च एतद् विष्णोः परमं पदं च एतत् रुद्रस्य रुद्रत्वं एतत् तत् परिमितधा वा आत्मानं विभज्य पूरयति इमां लोकान् इति एवं हि आह ॥

वह्नेः च यद्वत् खलु विष्फुलिंगाः सूर्यात् मयूखाः। च तथा एव तस्य। प्राणादयः वै पुनः एव तस्मात् अभ्युच्चरन्ति इह यथा क्रमेण ॥२६॥

अथान्यत्राप्युक्तं ब्रह्मणो वावैतत्तेजः परस्यामृतस्याशरीरस्य यच्छरीरस्यौष्ण्यमस्यैतद्घृतमथाऽऽविः सन्नभसि निहितꣳ वैतदेकाग्रेणैवमन्तर्हृदयाकाशꣳ विनुदन्ति यत्तस्य ज्योतिरिव सम्पद्यतीत्यतस्तद्भावमचिरेणैति भूमावयष्पिण्डं निहितꣳ यथाऽचिरेणैति भूमित्वं मृद्वत्सꣳस्थमयष्पिण्डꣳ यथाऽग्न्ययस्कारादयो नाभिभवन्ति प्रणश्यति चित्तं तथाऽऽश्रयेण सहैवमित्येवꣳ ह्याह ॥

हृद्याकाशमयं कोशमानन्दं परमालयम् ॥
स्वꣳ योगश्च ततोऽस्माकं तेजश्चैवाग्निसूर्ययोः ॥२७॥

अथान्यत्राप्युक्तं भूतेन्द्रियार्थानतिक्रम्य ततः प्रवृज्याज्यं धृतिदण्डं धनुर्गृहीत्वाऽनभिमानमयेन वैवेषुणा तं ब्रह्मद्वारपारं निहत्याद्यꣳ सम्मोहमौली तृष्णेर्ष्याकुण्डली तन्द्रीराघवेत्र्यभिमानाध्यक्षः क्रोधज्यं प्रलोभदण्डं धनुर्गृहीत्वेच्छामयेन चैवेषुणेमानि खलु भूतानि हन्ति तꣳ हत्वोङ्कारप्लवेनान्तर्हृदयाकाशस्य पारं तीर्त्वाऽऽविर्भूतेऽन्तराकाशे शनकैरवटैवावटकृद्धातुकामः सꣳविशत्येवं ब्रह्मशालाꣳविशेत्ततश्चतुर्जालं ब्रह्मकोशं प्रणुदेद्गुर्वागमेनेत्यतः शुद्धः पूतः शून्यः शान्तोऽप्राणो निरात्माऽनन्तोऽक्षय्यः स्थिरः शाश्वतोऽजः स्वतन्त्रः स्वे महिम्नि तिष्ठत्यतः स्वे महिम्नि तिष्ठमानं दृष्ट्वाऽऽवृत्तचक्रमिव सꣳसारचक्रमालोकयतीत्येवꣳ ह्याह॥

षड्भिर्मासैस्तु युक्तस्य नित्यमुक्तस्य देहिनः ॥
आनन्दः परमो गुह्यः सम्यग्योगः प्रवर्तते ॥

अथ अन्यत्र अपि उक्तम्—

ब्रह्मणः वाव एतत् तेजः परस्य अमृतस्य अशरीरस्य यत् शरीरस्य औष्ण्यं अस्य एतद् घृतं अथ आविः सन् नभसि निहितं वा एतद् एकाग्रेण एवं अन्तर्हृदयाकाशं विनुदन्ति यत् तस्य ज्योतिः इव संपद्यति इति, अतः तद्भावं अचिरेण एति भूमौ अयष्पिण्डं निहितं यथा अचिरेण एति भूमित्वं मृद्वत्संस्थं अयष्पिण्डं यथा अग्न्ययस्कारादयः न अभि भवन्ति प्रणश्यति चित्तं तथा आश्रयेण सह एवं इति एवं हि आह ॥

हृदि आकाशमयं कोशं आनन्दं परं आलयं ।
स्वं योगः च ततः अस्माकं तेजः च एव अग्नि-
सूर्ययोः ॥२७॥

अथ अन्यत्र अपि उक्तम्—

भूतेन्द्रियार्थान् अतिक्रम्य ततः प्रवृज्याज्यं धृतिदण्डं धनुः गृहीत्वा अनभिमानमयेन वा एव इषुणा तं ब्रह्मद्वारपारं निहत्य आद्यं सम्मोहमौली तृष्णा-ईर्ष्या-कुण्डली तन्द्रीराघवेत्री अभिमानाध्यक्षः क्रोधज्यं प्रलोभदण्डं धनुः गृहीत्वा इच्छामयेन च एव इषुणा इमानि खलु भूतानि हन्ति तं हत्वा ओँङ्कारप्लवेन अन्तर्हृदयाकाशस्य पारं तीर्त्वा आविर्भूते अन्तराकाशे शनकैः अवट इव अवटकृत् धातुकामः संविशति, एवं ब्रह्मशालां विशेत् ततः चतुर्जालं ब्रह्मकोशं प्रणुदेत् गुर्वागमेन इति, अतः शुद्धः पूतः शून्यः शान्तः अप्राणः निरात्मा अनन्तः अक्षय्यः स्थिरः शाश्वतः अजः स्वतन्त्रः स्वे महिम्नि तिष्ठति, अतः स्वे महिम्नि तिष्ठमानं दृष्ट्वा आवृत्तचक्रं इव संसारचक्रं आलोकयति इति एवं हि आह ॥

षड्भिः मासैः तु युक्तस्य नित्यमुक्तस्य देहिनः ।
आनन्दः परमः गुह्यः सम्यक् योगः प्रवर्तते ॥

रजस्तमोभ्यां॑ विद्धस्य सुसंमिद्धस्य देहिनः ॥
पुत्रदारकुटुम्बेषु सक्तस्य न कदाचन ॥२८॥

एवमुक्त्वाऽन्तर्हृदयः शाकायन्यस्तस्मै नमस्कृत्वाऽनया ब्रह्मविद्यया राजन्ब्रह्मणः पन्थानमारूढाः पुत्राः प्रजापतेरिति सन्तोषं द्वन्द्वतितिक्षां॑शान्तत्वं॑ योगाभ्यासादवाप्नोतीत्येतद्गुह्यतमं नापुत्राय नाशिष्याय नाशान्ताय कीर्तयेदित्यनन्यभक्ताय सर्वगुणसम्पन्नाय दद्यादिति ॥२९॥

ॐ शुचौ देशे शुचिः सत्वस्थः सदधीयानः सद्वादी सद्ध्यायी सद्याजी स्यादित्यतः सद्ब्रह्मणि सत्याभिलाषिणि निर्वृत्तोऽन्यस्तत्फलच्छिन्नपाशो निराशः परेष्वात्मवद्विगतभयो निःकामोऽक्षय्यमपरिमितं॑ सुखमाक्रम्य तिष्ठति परमं॑ वै शेवधेरिव परस्योद्धरणं॑ यन्निःकामत्वं॑ स हि सर्वकाममयः पुरुषोऽध्यवसायसङ्कल्पाभिमानलिङ्गो बद्धोऽतस्तद्विपरीतो मुक्तोऽत्रैकऽआहुर्गुणः प्रकृतिभेदवशादध्यवसायात्मबन्धमुपागतोऽध्यवसायस्य दोषक्षयाद्विमोक्षो मनसा ह्येव पश्यति मनसा शृणोति कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं *मनऽएव गुणौघैरुह्यमानः कलुषीकृतश्चास्थिरश्चञ्चलो लुप्यमानः सस्पृहोऽव्यग्रश्चाभिमानित्वं प्रयातऽइत्यहं॑ सो, ममेदमित्येवं मन्यमानो निबध्नात्यात्मनाऽऽत्मानं जालेनेव खचरोऽन्तःपुरुषोऽध्यवसायसङ्कल्पाभिमानलिङ्गोऽवबद्धोऽतस्तद्विपरीतो मुक्तस्तस्मान्निरध्यवसायो निःसङ्कल्पो निरभिमानस्तिष्ठेदेतन्मोक्षलक्षणमेषाऽत्र ब्रह्मपदव्येषोऽत्र द्वारविवरोऽनेनास्य तमसः पारं गमिष्यत्यत्र हि सर्वे कामाः

रजस्तमोभ्यां विद्धस्य सुसमिद्धस्य देहिनः ।
पुत्रदारकुटुम्बेषु सक्तस्य न कदाचन ॥२८॥

एवं उक्त्वा अन्तर्हृदयः शाकायन्यः तस्मै नमः कृत्वा अनया ब्रह्मविद्यया राजन् ब्रह्मणः पन्थानं आरूढाः पुत्राः प्रजापतेः इति सन्तोषं द्वन्द्वतितिक्षां शान्तत्वं योगाभ्यासात् अवाप्नोति इति, एतत् गुह्यतमं न अपुत्राय न अशिष्याय न अशान्ताय कीर्तयेत् इति, अनन्यभक्ताय सर्वगुणसंपन्नाय दद्यात् इति ॥२९॥

ॐ शुचौ देशे शुचिः सत्वस्थः सदधीयानः सद्वादी सद्ध्यायी सद्याजी स्यात् इति अतः सद् ब्रह्मणि सत्याभिलाषिणी निर्वृत्तः अन्यः तत्फलछिन्नपाशः निराशः परेषु आत्मवत् विगतभयः निःकामः अक्षय्यं अपरिमितम् सुखं आक्रम्य तिष्ठति परमं वै शेवधेः इव परस्य उद्धरणं यत् निःकामत्वं सः हि सर्वकाममयः पुरुषः अध्यवसायसंकल्पाभिमानलिङ्गः बद्धः, अतः तद्विपरीतः मुक्तः, अत्र एकः आहुः गुणः प्रकृति भेदवशात् अध्यवसायात्मबन्धं उपागतः अध्यवसायस्य दोषक्षयात् विमोक्षः मनसा हि एव पश्यति, मनसा शृणोति कामः संकल्पः विचिकित्सा श्रद्धा अश्रद्धा धृतिः अधृतिः ह्रीः धीः भीः इति एतत्सर्वं मन एव, गुणौघैः उह्यमानः कलुषीकृतः च अस्थिरः चञ्चलः लुप्यमानः सस्पृहः अव्यग्रः च अभिमानित्वं प्रयातः इति अहं सः मम इदं इति एवं मन्यमानः निबध्नाति आत्मना आत्मानं जालेन इव खचरः अन्तःपुरुषः अध्यवसायसंकल्पाभिमानलिङ्गः अवबद्धः, अतः तद्विपरीतः मुक्तः, तस्मात् निरध्यवसायः निःसंकल्पः निरभिमानः तिष्ठेत् एतत् मोक्षलक्षणं, एषा अत्र ब्रह्मपदवी, एषः द्वारविवरः, अनेन अस्य तमसः पारं गमिष्यति, अत्र हि सर्वे कामाः

---

* बृहदार० उ० १।५।३

समाहिता इत्यत्रोदाहरन्ति ॥ ×यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ॥ बुद्धिस्तु न विचेष्टते तामाहुः परमां गतिमित्येतदुक्त्वाऽन्तर्हृदयः शाकायन्यस्तस्मै नमस्कृत्वा यथावदुपचारी कृतकृत्यो मरुदुत्तरायणं गतो न ह्यत्रोद्वर्त्मना गतिरेषोऽत्र ब्रह्मपथः सौरं द्वारं भित्त्वोर्ध्वेन विनिर्गतऽइत्यत्रोदाहरन्ति ॥

अनन्ता रश्मयस्तस्य दीपवद्यः स्थितो हृदि ॥
सितासिताः कद्रुनीलाः कपिला मृदुलोहिताः ॥
ऊर्ध्वमेकः स्थितस्तेषाᳪं यो भित्त्वा सूर्यमण्डलम् ॥
ब्रह्मलोकमतिक्रम्य तेन यान्ति परां गतिम् ॥
यदस्यान्यद्रश्मिशतमूर्ध्वमेव व्यवस्थितम् ॥
तेन देवनिकायानाᳪं स्वधामानि प्रपद्यते ॥
ये नैकरूपाश्चाधस्ताद्रश्मयोऽस्य मृदुप्रभाः ॥
इह कर्मोपभोगाय तैः सᳪंसरति सोऽवशः ॥
तस्मात्सर्गस्वर्गापवर्गहेतुर्भगवानसावादित्यऽइति ॥२०॥

किमात्मकानि वाऽएतानीन्द्रियाणि प्रचरन्त्युद्गन्ता चैतेषामिह को नियन्ता चेत्याह प्रत्याहाऽऽत्मात्मकानीत्यात्मा ह्येषामुद्गन्ता नियन्ता चाप्सरसो भानवीयाश्च मरीचयो नामाथ पञ्चभी रश्मिभिर्विषयानत्तीति कतमऽआत्मेति योऽयᳪं शुद्धः पूतः शून्यः शान्तादिलक्षणोक्तः स्वकैर्लिङ्गैरुपगृह्यस्तस्यैतल्लिङ्गमलिङ्गस्याग्नेर्यदौष्ण्यमाविष्टं चापाᳪं यः शिवतमो रसऽइत्येकेऽथ वाक्श्रोत्रं चक्षुर्मनः प्राणऽइत्येकेऽथ बुद्धिर्धृतिः स्मृतिः प्रज्ञानमित्येकेऽथ ते

समाहिताः इति अत्र उदाहरन्ति॥यदा पञ्च अवतिष्ठन्ते ज्ञानानि मनसा सह ॥ बुद्धिः तु न विचेष्टते तां आहुः परमां गतिं इति एतत् उक्त्वा अन्तर्हृदयः शाकायन्यः तस्मै नमः कृत्वा यथावत् उपचारी कृतकृत्यः मरुत् उत्तरायणं गतः न हि अत्र उद्वर्त्मना गतिः, एषः अत्र ब्रह्मपथः सौरं द्वारं भित्त्वा ऊर्ध्वेन विनिर्गतः इति अत्र उदाहरन्ति ॥

अनन्ता रश्मयः तस्य दीपवद् यः स्थितः हृदि ।
सितासिताः कद्रुनिलाः कपिलाः मृदुलोहिताः॥
ऊर्ध्वं एकः स्थितः तेषां यः भित्त्वा सूर्यमण्डलं।
ब्रह्मलोकं अतिक्रम्य तेन यान्ति परां गतिं ॥
यत् अस्य अन्यत् रश्मिशतं ऊर्ध्वं एव व्यव-
स्थितं तेन देव--निकायानां स्वधामानि प्रपद्यते॥
ये न एकरूपाः च अधस्तात् रश्मयः अस्य
मृदुप्रभाः । इह कर्मोपभोगाय तैः संसरति
सः अवशः ॥ तस्मात् सर्गः स्वर्गापवर्गहेतुः
भगवान् असौ आदित्यः इति ॥२०॥

किं आत्मकानि वै एतानि इन्द्रियाणि प्रचरन्ति उद्गन्ता च एतेषां इह कः नियन्ता च इति आह प्रत्याह आत्मात्मकानि इति, आत्मा हि एषां उद्गन्ता नियन्ता च, अप्सरसः भानवीयाः च मरीचयः नाम अथ पञ्चभिःरश्मिभिः विषयान् अत्ति इति कतम आत्मा इति, यः अयं शुद्धः पूतः शून्यः शान्तादिलक्षणोक्तः स्वकैः लिङ्गैः उपगृह्य तस्य एतत् लिङ्गं अलिङ्गस्य अग्नेः यद् औष्ण्यं आविष्टं च अपां यः शिवतमः रस इत्येके, अथ वाक् श्रोत्रं चक्षुः मनः प्राणः इति एके, अथ बुद्धिः धृतिः स्मृतिः प्रज्ञानं इति एके, अथ ते

× कठ उ० ६।१०

वाऽएतस्यैवꣳ यथैवेह बीजस्याङ्कुरा वाऽथ धूमार्चिर्विष्फुलिङ्गाऽइवाग्नेश्चेत्यत्रोदाहरन्ति ॥

वह्नेश्च यद्वत्खलु विष्फुलिङ्गाः सूर्यान्मयूखाश्च तथैव तस्य ॥
प्राणादयो वै पुनरेव तस्मादभ्युच्चरन्तीह यथा क्रमेण ॥३१॥

तस्माद्वाऽएतस्मादात्मनि सर्वे प्राणाः सर्वे लोकाः सर्वे वेदाः सर्वे देवाः सर्वाणि च भूतान्युच्चरन्ति तस्योपनिषत्सत्यस्य सत्यमित्यथ यथार्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा निश्चरन्त्येवꣳ वाऽएतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसऽइतिहासः पुराणꣳ विद्याऽउपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि विश्वा भूतानि ॥३२॥

पञ्चेष्टको वाऽएषोऽग्निर्यत्सꣳवत्सरस्तस्येमाऽइष्टका यो वसन्तो ग्रीष्मो वर्षा शरद्धेमन्तः शिशिरः सशिरःपक्षसीपृष्ठपुच्छवानेषोऽग्निः पुरुषविधः सेयं पृथिवी प्रजापतेः प्रथमा चितिः, करैर्यजमानमन्तरिक्षमुत्क्षिप्त्वा वायवे प्रायच्छत्प्राणो वै वायुः प्राणोऽग्निस्तस्येमाऽइष्टका यः प्राणोऽपानो व्यानः समानऽउदानः सशिरःपक्षसीपृष्ठपुच्छवानेषोऽग्निः पुरुषविधस्तदिदमन्तरिक्षं प्रजापतेर्द्वितीया चितिः, करैर्यजमानं दिवमुत्क्षिप्त्वेन्द्राय प्रायच्छदसौ वाऽआदित्यऽइन्द्रः सैषोऽग्निस्तस्येमाऽइष्टका यदृग्यजुःसामाथर्वाङ्गिरसऽइतिहासः पुराणꣳ सशिरःपक्षसीपृष्ठपुच्छवानेषोऽग्निः पुरुषविधस्तस्यैषा द्यौः प्रजापतेस्तृतीया चितिः, करैर्यजमानस्यात्मविदेऽवदानं करोत्यथात्मविदुत्क्षिप्य ब्रह्मणे प्रायच्छत्तत्रानन्दी मोदी भवति॥३३॥

वै एतस्य एवं यथा एव इह बीजस्य अंकुरा वा, अथ धूमार्चिः विष्फुलिंगाः इव अग्नेः च इति अत्र उदाहरन्ति ॥

वह्नेः च यद्वत् खलु विष्फुलिङ्गाः सूर्यात्
मयूखाः च तथैव तस्य॥ प्राणादयः वै पुनः एव
तस्मात् अभ्युच्चरन्ति इह यथा क्रमेण ॥३१॥

तस्मात् वै एतस्मात् आत्मनि सर्वे प्राणाः सर्वे लोकाः सर्वे वेदाः सर्वे देवाः सर्वाणि च भूतानि उच्चरन्ति तस्य उपनिषत् सत्यस्य सत्यं इति, अथ आर्द्रैधाग्नेः अभ्याहितस्य पृथक् धूमाः निश्चरन्ति, एवं वै एतस्य महतः भूतस्य निश्वसितं एतद् यद् ऋग्वेदः यजुर्वेदः सामवेदः अथर्वाङ्गिरसः इतिहासः पुराणं विद्याः उपनिषदः श्लोकाः सूत्राणि अनुव्याख्यानानि व्याख्यानानि अस्य एव एतानि विश्वा भूतानि ॥३२॥

पञ्चेष्टकः वै एषः अग्निः यत् संवत्सरः, तस्य इमाः इष्टकाः यः वसन्तः ग्रीष्मः वर्षा शरद् हेमन्तः शिशिरः, सः शिरःपक्षसीपृष्ठपुच्छवान् एषः अग्निः पुरुषविधः, सा इयं पृथिवी प्रजापतेः प्रथमा चितिः, करैः यजमानं अंतरिक्षं उत्क्षिप्त्वा वायवे प्रायच्छत्, प्राणः वै वायुः, प्राणः अग्निः, तस्य इमाः इष्टकाः यः प्राणः अपानः व्यानः समानः उदानः सशिरःपक्षसीपृष्ठपुच्छवान् एषः अग्निः पुरुषविधः, तत् इदं अंतरिक्षं प्रजापतेः द्वितीया चितिः, करैः यजमानं दिवं उत्क्षिप्त्वा इन्द्राय प्रायच्छत्, असौ वै आदित्यः इन्द्रः, सः एषः अग्निः तस्य इमाः इष्टकाः यत् ऋक्-यजु-साम-अथर्वाङ्गिरसः इतिहासः पुराणं, सशिरःपक्षसीपृष्ठपुच्छवान् एषः अग्निः पुरुषविधः, तस्य एषा द्यौः प्रजापतेः तृतीया चितिः, करैः यजमानस्य आत्मविदे अवदानं करोति, अथ आत्मवित् उत्क्षिप्य ब्रह्मणे प्रायच्छत् तत्र आनन्दी मोदी भवति ॥३३॥

पृथिवी गार्हपत्योऽन्तरिक्षं दक्षिणाग्निर्द्यौराहवनीयस्तत्तऽएव पवमानः पावकः शुचिर्यऽ आविष्कृतमेतेनास्य यज्ञꣳ यतः पवमानपावकशुचिसङ्घातो हि जाठरस्तस्मादग्निर्यष्टव्यश्चेतव्यः स्तोतव्योऽभिध्यातव्यो यजमानो हविर्गृहीत्वा देवताभिध्यानमिच्छति ॥

हिरण्यवर्णः शकुनो हृद्यादित्ये प्रतिष्ठितः ॥
मद्गुर्हꣳसस्तेजो वृषः सोऽस्मिन्नग्नौ यजामहऽइति ॥

चापि मन्त्रार्थꣳ विचिनोति तत्सवितुर्वरेण्यं भर्गोऽस्याभिध्येयꣳ यो बुद्ध्यन्तस्थोऽध्यायी ह मनः शान्तिपदमनुसरत्यात्मन्येव धत्तेऽत्रेमे श्लोका भवन्ति ॥

यथा निरिन्धनो वह्निः स्वयोनाऽउपशाम्यते ॥
तथा वृत्तिक्षयाच्चित्तꣳ स्वयोनाऽउपशाम्यते ॥१॥
स्वयोनाऽउपशान्तस्य मनसः सत्यकामतः ॥
इन्द्रियार्थविमूढस्यानृताः कर्मवशानुगाः ॥२॥
चित्तमेव हि सꣳसारं तत्प्रयत्नेन शोधयेत् ॥
यच्चित्तस्तन्मयो भवति गुह्यमेतत्सनातनम् ॥३॥
चित्तस्य हि प्रसादेन हन्ति कर्म्म शुभाशुभम् ॥
प्रसन्नात्माऽऽत्मनि स्थित्वा सुखमव्ययमश्नुते ॥४॥
समासक्तꣳ यथाचित्तं जन्तोर्विषयगोचरे ॥
यद्येवं ब्रह्मणि स्यात्तत्को न मुच्येत बन्धनात् ॥५॥
मनो हि द्विविधं प्रोक्तꣳ शुद्धं चाशुद्धमेव च ॥
अशुद्धं कामसम्पर्काच्छुद्धं कामविवर्जितम् ॥६॥

पृथिवी गार्हपत्यः, अन्तरिक्षं दक्षिणाग्निः, द्यौः आहवनीयः, तत एव पवमानः पावकः शुचिः यः आविष्कृतं एतेन अस्य यज्ञं, यतः पवमानपावकशुचिसङ्घातः हि जाठरः, तस्मात् अग्निः यष्टव्यः चेतव्यः स्तोतव्यः अभिध्यातव्यः यजमानः हविः गृहीत्वा देवताऽभिध्यानं इच्छति ॥

हिरण्यवर्णः शकुनः हृदि आदित्ये प्रतिष्ठितः ॥
मद्गुः हंसः तेजः वृषः सः अस्मिन् अग्नौ यजामहे इति ॥

च अपि मन्त्रार्थं विचिनोति, तत्सवितुः वरेण्यं भर्गः अस्य अभिध्येयं, यः बुध्यन्तस्थः अध्यायी ह मनः शान्तिपदं अनुसरति, आत्मनि एव धत्ते, अत्र इमे श्लोकाः भवन्ति ॥

यथा निरिन्धनः वह्निः स्वयोनौ उपशाम्यते ॥
तथा वृत्तिक्षयात् चित्तं स्वयोनौ उपशाम्यते ॥१॥
स्वयोनौ उपशान्तस्य मनसः सत्यकामतः ॥
इन्द्रियार्थविमूढस्य अनृताः कर्मवशानुगाः ॥२॥
चित्तं एव हि संसारं तत् प्रयत्नेन शोधयेत् ॥
यच्चित्तः तन्मयः भवति गुह्यं एतत् सनातनम् ॥३॥
चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभम् ॥
प्रसन्नात्मा आत्मनि स्थित्वा सुखं अव्ययं अश्नुते ॥४
समासक्तं यथाचित्तं जन्तोः विषयगोचरे ॥
यदि एवं ब्रह्मणि स्यात् तत् कः न मुच्येत बन्धनात् ५
मनः हि द्विविधं प्रोक्तं शुद्धं च अशुद्धं एव च ॥
अशुद्धं कामसम्पर्कात् शुद्धं कामविवर्जितम् ॥६॥

लयविक्षेपरहितं मनः कृत्वा सुनिश्चलम् ॥
यदा यात्यमनीभावं तदा तत्परमं पदम् ॥७॥
तावन्मनो निरोद्धव्य२ हृदि यावत्क्षयं गतम् ॥
एतज्ज्ञानं च मोक्षं च शेषोऽन्यो ग्रन्थविस्तरः ॥८॥
समाधिनिर्धौतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत् ॥
न शक्यते वर्णयितुं गिरा तदा स्वयं तदन्तःकरणेन गृह्यते ॥९॥
अपामापोऽग्निरग्नौ वा व्योम्नि व्योम न लक्षयेत् ॥
एवमन्तर्गतं यस्य मनः स परिमुच्यते ॥१०॥
मनऽएवं मनुष्याणां कारणं बन्धमोक्षयोः ॥
बन्धाय विषयासङ्गि मोक्षे निर्विषयं स्मृतम् ॥११॥ इति ॥

अतोऽनग्निहोत्र्यनग्निचिदज्ञानाभिध्यायिनाम् ॥ ब्रह्मणस्पदव्योमानुस्मरण२ विरुद्धं तस्मादग्निर्यष्टव्यश्चेतव्यः स्तोतव्योऽभिध्यातव्यः ॥३४॥

नमोऽग्नये पृथिवी३क्षिते लोकस्मृते लोकमस्मै यजमानाय धेहि, नमो वायवेऽन्तरिक्षक्षिते लोकस्मृते लोकमस्मै यजमानाय धेहि, नमऽआदित्याय दिविक्षिते लोकस्मृते लोकमस्मै यजमानाय धेहि, नमो ब्रह्मणे सर्वक्षिते सर्वस्मृते सर्वमस्मै यजमानाय धेहि ॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ॥
तत्त्वं पूषन्नपावृणु सत्यधर्माय विष्णवे ॥
योऽसावऽआदित्ये पुरुषः सोऽसावऽहम् ॥×

लयविक्षेपरहितं मनः कृत्वा सुनिश्चलम् ॥
यदा याति अमनाभावं तदा तत् परमं पदम् ॥७॥
तावत् मनः निरोद्धव्यं हृदि यावत् क्षयं गतं ॥
एतत् ज्ञानं च मोक्षं च शेषः अन्यः ग्रंथविस्तरः ॥८॥
समाधिनिर्धौतमलस्य चेतसः निवेशितस्य आत्मनि यत् सुखं भवेत्॥ न शक्यते वर्णयितुं गिरा तदा स्वयं तदन्त करणेन गृह्यते ॥९॥
अपां आपः अग्निः अग्नौ वा व्योम्नि व्योम न लक्षयेत्।
एवं अन्तर्गतं यस्य मनः स परिमुच्यते ॥१०॥
मनः एव मनुष्याणां कारणं बन्धमोक्षयोः ॥
बन्धाय विषयासङ्गि मोक्षे निर्विषयं स्मृतम्॥११॥

अतः अनग्निहोत्र्यनग्निचिदज्ञानाभिध्यायिनाम् ॥ ब्रह्मणस्पदव्योम अनुस्मरणं विरुद्धं तस्मात् अग्निः यष्टव्यः चेतव्यः स्तोतव्यः अभिधातव्यः ॥३४॥

नमः अग्नये पृथिवीक्षिते लोकस्मृते लोकं अस्मै यजमानाय धेहि, नमः वायवे अंतरिक्षक्षिते लोकस्मृते लोकं अस्मै यजमानाय धेहि, नमः आदित्याय दिविक्षिते लोकस्मृते लोकमस्मै यजमानाय धेहि, नमः ब्रह्मणे सर्वक्षिते सर्वस्मृते सर्वं अस्मै यजमानाय धेहि ॥

हिरण्मयेन पात्रेण सत्यस्य अपिहितं मुखं।
तत्त्वं पूषन् अपावृणु सत्यधर्माय विष्णवे ॥
यः असौ आदित्ये पुरुषः सः असौ अहं ॥

× काण्व यजुः [दृष्टये = विष्णवे] ४०।१५-१६; ईश उ० १५-१६

इत्येष ह वै सत्यधर्मो यदादित्यस्यादित्यत्वं तच्छुक्रं पुरुषमलिङ्गं नभसोऽन्तर्गतस्य तेजसोꣳशमात्रमेतद्यदादित्यस्य मध्यऽइवेत्यक्षिण्यग्नौ चैतद्ब्रह्मैतदमृतमेतद्भर्गऽएतत्सत्यधर्मो नभसोऽन्तर्गतस्य तेजसोꣳशमात्रमेतद्यदादित्यस्य मध्येऽअमृतꣳ यस्य हि सोमः प्राणा वाऽअप्यङ्कुराऽएतद्ब्रह्मैतदमृतमेतद्भर्गऽएतत्सत्यधर्मो नभसोऽन्तर्गतस्य तेजसोꣳशमात्रमेतद्यदादित्यस्य मध्ये यजुर्दीप्यत्यो३मापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरो३मित्यष्टपादꣳशुचिꣳ हꣳसं त्रिसूत्रं मनुमव्ययं द्विधर्मोऽन्धं तेजसेद्धꣳ सर्वं पश्यन्पश्याति नभसोऽन्तर्गतस्य तेजसोꣳशमात्रमेतद्यदादित्यस्य मध्येऽउदित्वा मयूखे भवतऽएतत्संवित्सत्यधर्मऽएतद्यजुरेतत्तपऽएतदग्निरेतद्वायुरेतत्प्राणऽएतदापऽएतच्चन्द्रमाऽएतच्छुक्रमेतदमृतमेतद्ब्रह्मविषयऽएतद्भानुरर्णवस्तस्मिन्नेव यजमानाः सैन्धवऽइव व्लीयन्तऽएषा वै ब्रह्मैक्यताऽत्र हि सर्वे कामाः समाहिताऽइत्यत्रोदाहरन्ति ॥ अꣳशुधारयऽइवाणुर्वातेरितः सꣳस्फुरत्यसावन्तर्गतः सुराणाꣳ यो हैवꣳवित्स सवित्स द्वैतवित्सैकधामेतः स्यात्तदात्मकश्च ॥

ये बिन्दवऽइवाभ्युच्चरन्त्यजस्रꣳ विद्युदिवाभ्रार्चिषः परमे व्योमन् ॥
तेऽर्चिषो वै यशसऽआश्रयवशाज्जटाभिरूपाऽइव कृष्णवर्त्मनः ॥३५॥

तस्मादोमित्यनेनैतदुपासीतापरिमितं तेजस्तत्त्रेधाऽभिहितमग्नाऽआदित्ये प्राणेऽथैषा नाड्यन्नबहुमित्येषाऽग्नौ हुतमादित्यं गमयत्यतोऽआदित्ये यो रसोऽस्रवत्सऽउद्गीथꣳ वर्षति तेनेमे

इति एषः ह वै सत्यधर्मः, यत् आदित्यस्य, आदित्यत्वं तच्छुक्रं पुरुषं अलिङ्गं नभसः अन्तर्गतस्य तेजसः अंशमात्रं, एतद् यद् आदित्यस्य मध्ये इव इति अक्षिणी अग्नौ च एतद् ब्रह्म एतद् अमृतं एतद् भर्गः एतद् सत्यधर्मः, नभसः अंतर्गतस्य तेजसः अंशमात्रं, एतत् यद् आदित्यस्य मध्ये अमृतं, यस्य हि सोमः प्राणा वा अपि अङ्कुरा, एतद् ब्रह्म एतद् अमृतं एतद् भर्गः एतत् सत्यधर्मः, नभसः अंतर्गतस्य तेजसः अंशमात्रं, एतत् यद् आदित्यस्य मध्ये यजुः दीप्यति "ॐ आपः ज्योतिः रसः अमृतं ब्रह्म भुःभूवः स्वः ॐ" इति अष्टपादं शुचिं हसं त्रिसूत्रं मनुं अव्ययं द्विधर्मः अन्धं तेजसा इद्धं सर्वं पश्यन् पश्यति, नभसः अन्तर्गतस्य तेजसः अंशमात्रं, एतद् यद् आदित्यस्य मध्ये उदित्वा मयूखे भवतः, एतत् सवित् सत्यधर्मः, एतत् यजुः एतत् तपः एतद् अग्निः एतद् वायुः एतद् प्राणः एतद् आपः एतद् चन्द्रमा एतत् शुक्रं एतत् अमृतं एतद् ब्रह्मविषयः एतद् भानुः अर्णवः, तस्मिन् एव यजमानाः सैन्धवः इव व्लीयन्ते, एषा वै ब्रह्मैकयता, अत्र हि सर्वे कामाः समाहिताः इति, अत्र उदाहरन्ति ॥ अंशुधारय इव अणुः वातेरितः संस्फुरति असौ अन्तर्गतः सुराणां, यः ह एवंवित् सः सवित् सः द्वैतवित् सः एकधाम इतः स्यात् तदात्मकः च ॥

ये बिन्दवः इव अभ्युच्चरन्ति अजस्रं विद्युत् इव अभ्रार्चिषः परमे व्योमन् ॥ ते आर्चिषः वै यशसः आश्रयवशात् जटाभिरूपाः इव कृष्ण-वर्त्मनः ॥३५॥

तस्मात् ॐ इति अनेन एतद् उपासीत अपरिमितं तेजः, तत् त्रेधा अभिहितं अग्नौ आदित्ये प्राणे, अथ एषां नाड्यन्नबहुं इति एषा अग्नौ हुतं आदित्यं गमयति, अतो आदित्ये यः रसः अस्रवत् सः उद्गीथं वर्षति तेन इमे

---

१ पुण्यपत्तनस्थानन्दाश्रममुद्रिते उपनिषत्समुच्चयगते सभाष्यायां मैत्र्युपनिषदि त्वनयोः षट्त्रिंशत्सप्तत्रिंशयोः कण्डिकयोः पूर्वापरभावे परस्परं व्यत्यासो दृश्यत इति ॥

प्राणाः प्राणेभ्यः प्रजाऽइत्यत्रोदाहरन्ति ॥ यद्धविरग्नौ हूयते तदादित्यं गमयति तत्सूर्यो रश्मिभिर्वर्षति तेनान्नं भवत्यन्नाद्भूतानामुत्पत्तिरित्येवꣳ ह्याह ॥

अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते ॥
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥३६॥+

द्वे वाव खल्वेतद्ब्रह्म ज्योतिषो रूपके शान्तमेकꣳ समृद्धं चैकमथ यच्छान्तं तस्याधारं खमथ यत्समृद्धमिदं तस्यान्नं तस्मान्मन्त्रौषधाज्यमिव पुरोडाशस्थालीपाकादिभिर्यष्टव्यमन्तर्वेद्यामास्येऽवशिष्टैरन्नपानैश्चास्यमाहवनीयमिति मत्वा तेजसः समृद्ध्यै पुण्यलोकविजित्यर्थायामृतत्वाय चात्रोदाहरन्त्यग्निहोत्रं जुहुयात्स्वर्गकामो यमराज्यमग्निष्टोमेनाभिजयति सोमराज्यमुक्थेन सूर्यराज्यं षोडशिना स्वाराज्यमतिरात्रेण प्राजापत्यमासहस्रसꣳवत्सरान्तक्रतुनेति ॥

वर्त्याधारस्नेहयोगाद्यथा दीपस्य सꣳस्थितिः ॥
अन्तर्याण्डोपयोगादिमौ स्थितावात्मशुची तथा ॥३७॥

अग्निहोत्रं जुह्वानो लोभजालं भिनत्त्यतः सम्मोहं छित्त्वा न क्रोधꣳ स्तुन्वानः काममभिध्यायमानस्ततश्चतुर्जालं ब्रह्मकोशं भिन्दन्नतः परमाकाशमत्र हि सौरसौम्याग्नेयसात्त्विकानि मण्डलानि भित्त्वा ततः शुद्धः सत्त्वान्तरस्थमचलममृतमच्युतं ध्रुवꣳ विष्णुसंज्ञितꣳ सर्वापरं धाम सत्यकामसर्वज्ञत्वसꣳयुक्तꣳ स्वतन्त्रं चैतन्यं ततः स्वे महिम्नि तिष्ठमानं पश्यत्यत्रोदाहरन्ति ॥

प्राणाः प्राणेभ्यः प्रजाः इति अत्र उदाहरन्ति ॥ यद् हविः अग्नौ हूयते तत् आदित्यं गमयति, तत्सूर्यः रश्मिभिः वर्षति तेन अन्नं भवति अन्नात् भूतानां उत्पत्तिः इति एवं हि आह॥

अग्नौ प्रास्ताहुतिः सम्यक् आदित्यं उपतिष्ठते ।
आदित्यात् जायते वृष्टिः वृष्टेः अन्नं ततः प्रजाः ॥३६

द्वे वाव खलु एतत् ब्रह्म ज्योतिषः रूपके शान्तं एकं समृद्धं च एकं, अथ यत् शान्तं तस्य आधारं खं अथ यत् समृद्धं इदं तस्य अन्नं तस्मात् मन्त्रोषधाज्यं इव पुरोडाशस्थालीपाकादिभिः यष्टव्यं अन्तर्वेद्यां, आस्ये अवशिष्टैः अन्नपानैः च आस्यं आहवनीयं इति मत्वा तेजसः समृध्यै पुण्यलोकविजिति-अर्थाय अमृतत्वाय च, अत्र उदाहरन्ति, अग्निहोत्रं जुहुयात् स्वर्गकामः यमराज्यं अग्निष्टोमेन अभिजयति, सोमराज्यं उक्थेन, सूर्यराज्यं षोडशिना, स्वाराज्यं अतिरात्रेण, प्राजापत्यं आसहस्रसंवत्सरान्तक्रतुना इति ॥

वर्त्याधार-स्नेहयोगात् यथा दीपस्य संस्थितिः ।
अन्तर्याण्डोपयोगात् इमौ स्थितौ आत्मशुची तथा ॥३७॥

अग्निहोत्रं जुह्वानः लोभजालं भिनत्ति, अतः सम्मोहं छित्त्वा न क्रोधं स्तुन्वानः कामं अभिध्यायमानः ततः चतुर्जालं ब्रह्मकोशं भिन्दन् अतः परमाकाशं, अत्र हि सौरसौम्याग्नेयसात्विकानि मण्डलानि भित्त्वा ततः शुद्धः सत्त्वान्तरस्थं अचलं अमृतं अच्युतं ध्रुवं विष्णुसंज्ञितं सर्वापरं धाम सत्यकाम-सर्वज्ञत्वसंयुक्तं स्वतन्त्रं चैतन्यं ततः स्वे महिम्नि तिष्ठमानं पश्यति अत्र उदाहरन्ति ॥

+ मनु० ३।७६

रविमध्ये स्थितः सोमः सोममध्ये हुताशनः ॥
तेजोमध्ये स्थितꣳ सत्त्वꣳ सत्त्वमध्ये स्थितोऽच्युतः ॥

शरीरप्रादेशाङ्गुष्ठमात्रमणोरप्यणुं परमैक्यं ध्यात्वाऽतः परमतां गच्छत्यत्र हि सर्वे कामाः समाहिताऽइत्यत्रोदाहरन्ति ॥

अङ्गुष्ठप्रादेशशरीरमात्रं प्रदीपप्रतापवद्द्विस्त्रिधा हि ॥
तद्ब्रह्माभिष्टूयमानं महो देवो भुवनान्याविवेश ॥ ॐ नमो ब्रह्मणे नमः ॥३८॥

॥ इति मैत्रायणीयारण्यके षष्ठः प्रपाठकः ॥६॥

अथ सप्तमः प्रपाठकः ॥

॥ॐ॥ अग्निर्गायत्रं त्रिवृद्रथन्तरꣳ वसन्तः प्राणो नक्षत्राणि वसवः पुरस्तादुद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति पुनर्विशन्त्यन्तर्विवरेणेक्षन्त्याचिन्त्योऽमूर्तो गभीरो गुप्तोऽनवद्यो घनो गहनो निर्गुणः शुद्धो भास्वरो गुणभुग्भयोऽनिर्वृत्तिर्योगीश्वरः सर्वज्ञो मघोऽप्रमेयोऽनाद्यन्तः श्रीमानजो धीमाननिर्देश्यः सर्वसृक्सर्वस्यात्मा सर्वभुक्सर्वस्येशानः सर्वस्यान्तराऽऽन्तरऽ-इति ॥१॥

इन्द्रस्त्रिष्टुप्पञ्चदशो बृहद्ग्रीष्मो व्यानः सोमो रुद्रा दक्षिणतऽउद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति पुनर्विशन्त्यन्तर्विवरेणेक्षन्त्यनाद्यन्तोऽपरिमितोऽपरिच्छिन्नोऽपरप्रयोज्यः स्वतन्त्रोऽ-लिङ्गोऽमूर्तोऽनन्तशक्तिर्धाता भास्करऽइति ॥२॥

रविमध्ये स्थितः सोमः सोममध्ये हुताशनः
तेजोमध्ये स्थितं सत्त्वं सत्त्वमध्ये स्थितः अच्युतः॥

शरीरप्रादेशाङ्गुष्ठमात्रं अणोः अपि अणुं परमैक्यं ध्यात्वा अतः परमतां गच्छति, अत्र हि सर्वे कामाः समाहिताः इति अत्र उदाहरन्ति ॥

अंगुष्ठप्रादेशशरीरमात्रं प्रदीप--प्रतापवत् द्विः त्रिधा हि ॥ तद् ब्रह्म अभिष्टूयमानं महः देवः भुवनानि आविवेश ॐ नमः ब्रह्मणे नमः ॥३८॥

इति मैत्रायणीये आरण्यके षष्ठः प्रपाठकः ॥६॥

॥ अथ सप्तमः प्रपाठकः ॥

॥ॐ॥ अग्निः गायत्रं त्रिवृत् रथन्तरं वसन्तः प्राणः नक्षत्राणि वसवः पुरस्तात् उद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति पुनः विशन्ति, अन्तर्विवरेण ईक्षन्ति अचिन्त्यः अमूर्तः गभीरः गुप्तः अनवद्यः घनः गहनः निर्गुणः शुद्धः भास्वरः गुणभुग् अभयः अनिवृत्तिः योगीश्वरः सर्वज्ञः मघः अप्रमेयः अनाद्यन्तः श्रीमान् अजः धीमान् अनिर्देश्यः सर्वसृक् सर्वस्य आत्मा सर्वभुक् सर्वस्य ईशानः सर्वस्य अन्तरा-आन्तरः इति ॥१॥

इन्द्रः त्रिष्टुप् पञ्चदशः बृहत् ग्रीष्मः व्यानः सोमः रुद्राः दक्षिणतः उद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति पुनः विशन्ति अन्तर्विवरेण ईक्षन्ति, अनाद्यन्तः अपरिमितः अपरिच्छिन्नः अपरप्रयोज्यः स्वतन्त्रः अलिङ्गः अमूर्तः अनन्तशक्तिः धाता भास्करः इति ॥२॥

---

१ 'भुग्भयो' इति क्वचित्पाठः। तदा पदपाठे 'गुणभुग् भयः' इति पदच्छेदः, बिभेत्यस्मात्सर्वमिति भयः कालरूपः इत्यर्थवशादयमपि पाठः संगच्छते।

मरुतो जगती सप्तदशो वैरूपꣳ वर्षाऽअपानः शुक्रऽआदित्याः पश्चादुद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति पुनर्विशन्त्यन्तर्विवरेणेक्षन्ति तच्छान्तमशब्दमभयमशोकमानन्दं तृप्तꣳ स्थिरमचलममृतमच्युतं ध्रुवꣳ विष्णुसंज्ञितꣳ सर्वापरं धामेति ॥३॥

विश्वेदेवाऽअनुष्टुबेकविꣳशो वैराजः शरत्समानो वरुणः साध्याऽउत्तरतऽउद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति पुनर्विशन्त्यन्तर्विवरेणेक्षन्त्यन्तःशुद्धः पूतः शून्यः शान्तोऽप्राणो निरात्माऽनन्तऽइति ॥४॥

मित्रावरुणौ पङ्क्तिस्त्रिणवस्त्रयस्त्रिꣳशौ शाक्वररैवते हेमन्तशिशिराऽउदानोऽङ्गिरसश्चन्द्रमाऽऊर्ध्वाऽउद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति पुनर्विशन्त्यन्तर्विवरेणेक्षन्ति यः प्राज्ञो विधरणः सर्वान्तरोऽक्षरः शुद्धः पूतो भान्तः क्षान्तः शान्तऽइति ॥५॥

शनिराहुकेतूरगरक्षोयक्षनरविहङ्गशरभेभादयोऽधस्तादुद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति पुनर्विशन्त्यन्तर्विवरेणेक्षन्ति प्रणवाख्यꣳ प्रणेतारं भारूपꣳ विगतनिद्रꣳ विजरꣳ विमृत्युꣳ विशोकमिति ॥६॥

एष हि खल्वात्माऽन्तर्हृदयेऽणीयानिद्धोऽग्निरिव विश्वरूपोऽस्यैवान्नमिदꣳ सर्वमस्मिन्नोताऽइमाः प्रजाऽएष तऽआत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविचिकित्सोऽविपाशः सत्यसङ्कल्पः सत्यकामऽएष परमेश्वरऽएष भूताधिपतिरेष भूतपालऽएष सेतुर्विधरणऽएष हि खल्वात्मेशानः शम्भुर्भवो रुद्रः प्रजापतिर्विश्वसृग्घिरण्यगर्भः सत्यं प्राणो हꣳसः शास्ता-

---

मरुतः जगती सप्तदशः वैरूपं वर्षाः अपानः शुक्रः आदित्याः पश्चात् उद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति पुनः विशन्ति अन्तर्विवरेण ईक्षन्ति तत् शान्तं अशब्दं अभयं अशोकं आनन्दं तृप्तं स्थिरं अचलं अमृतं अच्युतं ध्रुवं विष्णुसंज्ञितं सर्वापरं धाम इति ॥३॥

विश्वेदेवाः अनुष्टुप् एकविंशः वैराजः शरत् समानः वरुणः साध्याः उत्तरतः उद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति पुनः विशन्ति अन्तर्विवरेण ईक्षन्ति, अन्तःशुद्धः पूतः शून्यः शान्तः अप्राणः निरात्मा अनन्तः इति ॥४॥

मित्रावरुणौ पंक्तिः त्रिणवः त्रयस्त्रिंशौ शाक्वररैवते हेमन्तशिशिरौ उदानः अङ्गिरसः चन्द्रमाः ऊर्ध्वाः उद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति पुनः विशन्ति अन्तर्विवरेण ईक्षन्ति, यः प्राज्ञः विधरणः सर्वान्तरः अक्षरः शुद्धः पूतः भान्तः क्षान्तः शान्तः इति ॥५॥

शनिराहुकेतूरगरक्षःयक्षनरविहङ्गशरभेभादयः अधस्तात् उद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति पुनः विशन्ति अन्तर्विवरेण ईक्षन्ति, प्रणवाख्यं प्रणेतारं भारूपं विगतनिद्रं विजरं विमृत्युं विशोकं इति ॥६॥

एषः हि खलु आत्मा अन्तर्हृदये अणीयान् इद्धः अग्निः इव विश्वरूपः अस्य एव अन्नं इदं सर्वं अस्मिन् ओताः इमाः प्रजाः एषः त आत्मा अपहतपाप्मा विजरः विमृत्युः विशोकः अविचिकित्सः अविपाशः सत्यसंकल्पः सत्यकामः एषः परमेश्वरः एषः भूताधिपतिः एषः भूतपालः एषः सेतुः विधरणः एषः हि खलु आत्मा ईशानः शम्भुः भवः रुद्रः प्रजापतिः विश्वसृक् हिरण्यगर्भः सत्यं प्राणः हंसः शास्ता

ऽच्युतो विष्णुर्नारायणो यश्चैषोऽग्नौ यश्चायꣳ हृदये यश्चासाऽआदित्ये सऽएषऽएकस्तस्मै ते विश्वरूपाय सत्ये नभसि हिताय नमः ॥७॥

अथेदानीं ज्ञानोपसर्गा राजन्मोहजालस्यैष वै योनिर्यदस्वर्ग्यैः सह स्वर्ग्यस्यैष वाक्ये पुरस्तादुक्तेऽप्यधःस्तम्बेनाश्लिष्यन्त्यथ ये चान्ये ह नित्यप्रमुदिता नित्यप्रवसिता नित्ययाचनका नित्यꣳ शिल्पोपजीविनोऽथ ये चान्ये ह पुरयाचकाऽअयाज्ययाजकाः शूद्रशिष्याः शूद्राश्च शास्त्रविद्वाꣳसोऽथ ये चान्ये ह वृथाकषायकुण्डलिनः कापालिनोऽथ ये चान्ये ह यक्षराक्षसभूतगणपिशाचोरगग्रहादीनामर्थं पुरस्कृत्य शमयामऽइत्येवं ब्रुवाणाऽअथ ये चान्ये ह चाटजटनटभटप्रव्रजितरङ्गावतारिणो राजकर्मणि पतितादयोऽथ ये चान्ये ह वृथातर्कदृष्टान्तकुहकेन्द्रजालैर्वैदिकेषु परिस्थातुमिच्छन्ति तैः सह न सꣳवसेत् ॥ प्रकाशभूता वै ते तस्कराऽअस्वर्ग्याऽइत्येवꣳह्याह ॥

नैरात्म्यवादकुहकैर्मिथ्यादृष्टान्तहेतुभिः ॥
भ्राम्यँल्लोको न जानाति वेदविद्यान्तरं तु यत् ॥८॥

बृहस्पतिर्वै शुक्रो भूत्वेन्द्रस्याभयायासुरेभ्यः क्षयायेमामविद्यामसृजत्तयाशिवमशिवमित्युद्दिशन्त्यशिवꣳ शिवमिति वेदादिशास्त्रहिꣳसकधर्माभिध्यानमस्त्विति वदन्त्यतो नैनामभिधीयेतान्यथैषा वन्ध्येवैषा रतिमात्रं फलमस्या वृत्तच्युतस्यैव नारम्भणीयेत्येवꣳ ह्याह ॥

दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता ॥
विद्याभीप्सितं नचिकेतसं मन्ये ॥ न त्वा कामा बहवो लोलुपन्ते ॥

अच्युतः विष्णुः नारायणः यः च एषः अग्नौ यः च अयं हृदये यः च असौ आदित्ये सः एषः एकः तस्मै ते विश्वरूपाय सत्ये नभसि हिताय नमः ॥७॥

अथ इदानीं ज्ञानोपसर्गाः राजन् मोहजालस्य एषः वै योनिः यत् अस्वर्ग्यैः सह स्वर्ग्यस्य एषः वाक्ये पुरस्तात् उक्ते अपि अधःस्तम्बेन आश्लिष्यन्ति अथ ये च अन्ये ह नित्यप्रमुदिताः नित्यप्रवसिताः नित्ययाचनकाः नित्यं शिल्पोपजीविनः अथ ये च अन्ये ह पुरयाचकाः× अयाज्ययाजकाः शूद्रशिष्याः, शूद्राः च शास्त्रविद्वांसः, अथ ये च अन्ये ह वृथा कषायकुण्डलिनः कापालिनः, अथ ये च अन्ये ह यक्षराक्षसभूतगणपिशाचोरगग्रहादीनां अर्थं पुरस्कृत्य शमयामः इति एवं ब्रुवाणाः, अथ ये च अन्ये ह चाट-जट-नट-भट-प्रव्रजितरङ्गावतारिणः राजकर्मणि पतितादयः, अथ ये च अन्ये ह वृथातर्कदृष्टान्तकुहकेन्द्रजालैः वैदिकेषु परिस्थातुं इच्छन्ति, तैः सह न संवसेत्। प्रकाशभूता वै ते तस्कराः अस्वर्ग्याः इति एवं हि आह।

नैरात्म्यवादकुहकैः मिथ्यादृष्टान्तहेतुभिः।
भ्राम्यन् लोकः न जानाति वेदविद्यान्तरं तु यत् ॥८

बृहस्पतिः वै शुक्रः भूत्वा इन्द्रस्य अभयाय असुरेभ्यः क्षयाय इमां अविद्यां असृजत् तया शिवं अशिवं इति उद्दिशन्ति, अशिवं शिवं इति, वेदादि-शास्त्रहिंसकधर्माभिध्यानं अस्तु इति वदन्ति, अतः न एनां अभिधीयेत अन्यथा एषा वन्ध्या इव एषा रतिमात्रं फलं अस्याः वृत्तच्युतस्य एव न आरम्भणीया इति एवं हि आह ॥

दूरं एते विपरीते विषूची अविद्या या च विद्या इति ज्ञाता। विद्याभीप्सितं नचिकेतसं मन्ये। न त्वा कामाः बहवः लोलुपन्ते ॥※॥

※ कठ उ० १।२।४ × पुरयाजकाः।

विद्यां चाविद्यां च यस्तद्वेदोऽभयꣳ सह ॥
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥×
अविद्यायामन्तरे वेष्ट्यमानाः स्वयं धीराः पण्डितंमन्यमानाः ॥
दन्द्रम्यमाणाः परियन्ति मूढाऽअन्धेनैव नीयमाना यथाऽन्धाऽइति ॥९॥+

देवासुरा ह वै यऽआत्मकामा ब्रह्मणोऽन्तिकं प्रयातास्तस्मै नमस्कृत्वोचुर्भगवन्वयमात्मकामाः स त्वं नो ब्रूहीत्यतश्चिरं ध्यात्वाऽमन्यततान्यतात्मानो वै ते सुराऽअतोऽन्यतममेतेषामुक्तं तदिमे मूढाऽउपजीवन्त्यभिष्वङ्गिणस्तर्याभिघातिनोऽनृताभिशꣳसिनः सत्यमिवानृतं पश्यन्तीन्द्रजालवदित्यतो यद्वेदेष्वभिहितं तत्सत्यꣳ यद्वेदेषूक्तं तद्विद्वाꣳसऽउपजीवन्ति तस्माद्ब्राह्मणो नावैदिकमधीयीतायमर्थः स्यादिति ॥१०॥

एतद्वाव तत्स्वरूपं नभसः खेऽन्तर्भूतस्य यत्परं तेजस्तत्त्रेधाऽभिहितमग्नाऽआदित्ये प्राणऽएतद्वाव तत्स्वरूपं नभसः खेऽन्तर्भूतस्य यदो३मित्येतदक्षरमनेनैव तदु तद्बुध्यत्युदयत्युच्छ्वसत्यजस्रं ब्रह्मधियाऽऽलम्बꣳवाऽअत्रैवैतत्समीरणे प्रकाशप्रक्षेपकौष्ण्यस्थानीयमेतद्धूमस्येव समीरणे नभसि प्रशाखयैवोत्क्रम्य स्कन्धात्स्कन्धमनुसरत्यप्सु प्रक्षेपको लवणस्येव घृतस्य चौष्ण्यमिवाभिध्यातुर्विस्तृतिरिवैतादित्यत्रोदाहरन्त्यथ कस्मादुच्यते वैद्युतो यस्मादुच्चारितमात्रऽएव सर्वꣳ शरीरꣳ विद्योतयति तस्मादो३मित्यनेनैतदुपासीतापरिमितं तेजः ॥

विद्यां च अविद्यां च यः तत् वेद: अभयं सह ॥ अविद्यया मृत्युं तीर्त्वा विद्यया अमृतं अश्नुते ॥×॥ अविद्यायां अन्तरे वेष्ट्यमानाः स्वयं धीराः पण्डितंमन्यमानाः ॥ दन्द्रम्यमाणाः परियन्ति मूढाः अन्धेन एव नीयमानाः यथा अन्धाः इति ॥९

देवा-असुराः ह वै ये आत्मकामाः ब्रह्मणः अन्तिकं प्रयाताः तस्मै नमःकृत्वा ऊचुः भगवन् वयं आत्म-कामाः सः त्वं नः ब्रूहि इति, अतः चिरं ध्यात्वा अमन्यत तान् यतात्मानः वै ते सुराः अतः अन्यतमं एतेषां उक्तं तद् इमे मूढाः उपजीवन्ति अभिष्वङ्गिणः तर्याभिघातिनः अनृताभिशंसिनः सत्यं इव अनृतं पश्यन्ति इन्द्रजालवत् इति, अतः यद् वेदेषु अभिहितं तत् सत्यं यद् वेदेषु उक्तं तत् विद्वांसः उपजीवन्ति, तस्मात् ब्राह्मणः न अवैदिकं अधीयीत अयं अर्थः स्यात् इति ॥१०॥

एतद् वाव तत् स्वरूपं नभसः खे अन्तर्भूतस्य यत् परं तेजः, तत् त्रेधा अभिहितं अग्नौ आदित्ये प्राणे, एतद् वाव तत् स्वरूपं नभसः खे अन्तर्भूतस्य यद् ॐ इति, एतद् अक्षरं अनेन एव तत् उ तत् बुध्यति उदयति उच्छ्वसति अजस्रं ब्रह्मधिया आलम्बं वा अत्र एव एतद् समीरणे प्रकाश-प्रक्षेपकौष्ण्यस्थानीयं एतद् धूमस्य इव समीरणे नभसि प्रशाखया इव उत्क्रम्य स्कन्धात् स्कन्धं अनुसरति, अप्सु प्रक्षेपकः लवणस्य इव घृतस्य च औष्ण्यं इव अभिध्यातुः विस्तृतिः इव एतद् इति, अत्र उदाहरन्ति, अथ कस्मात् उच्यते वैद्युतः यस्मात् उच्चारितमात्रे एव सर्वं शरीरं विद्योतयति तस्मात् ॐ इति अनेन एतद् उपासीत अपरिमितं तेजः ॥

× वा० यजु० ४०।११; ईश ११   + कठ उ० १।२।५

पु॒रु॑षश्चाक्षु॒षो यो॑ऽयं द॒क्षिणे॑ऽक्षि॒ण्यव॒स्थि॒तः ॥
इन्द्रो॑ऽय॒मस्य॑ जा॒येय॒ꣳ स॒व्ये चा॒क्षि॑ण्यव॒स्थि॒ता ॥१॥
स॒मा॒गम॑स्त॒योरे॒वं हृ॑द॒या॒न्तर्ग॑तः सु॒षौ ॥
ते॒ज॒स्तल्लो॑हि॒तस्या॒त्र पि॒ण्ड॑ऽए॒वोभ॒योस्त॒योः ॥२॥
हृ॒द॒या॒दा॒य॒ती॑ ता॒वच्च॒क्षु॑ष्य॒स्मिन्प्र॒ति॑ष्ठि॒ता ॥
सा॒ऽर॒णी॑ सा॒ त॒योर्ना॒डी॑ द्व॒योरे॒का॒ द्वि॒धा स॒ती ॥३॥
म॒नः का॒या॒ग्निमा॒ह॒न्ति॒ स॒ प्रे॒र॒य॒ति॒ मा॒रु॒त॒म् ॥
मा॒रु॒तस्तू॒र॒सि॒ च॒र॒न्म॒न्द्रं ज॒न॒य॒ति॒ स्व॒र॒म् ॥४॥
ख॒जा॒ग्नि॒सं॒यो॒गा॒द्धृ॒दि स॒म्प्र॒यु॒क्त॒म॒णो॒र्ह्य॒णु॒र्द्वि॒र॒णुः क॒ण्ठ॒दे॒शे॑ ॥
जि॒ह्वा॒ग्र॒दे॒शे॑ त्र्य॒णु॒कं च॒ वि॒द्धि॒ वि॒नि॒र्ग॒तं॑ मा॒तृ॒क॒मे॒व॒मा॒हुः ॥५॥
न॒ प॒श्य॒न्मृ॒त्युं प॒श्य॒ति॒ न॒ रो॒गं न॒ च॒ दुः॒ख॒ता॒म् ॥
स॒र्वं॒ꣳ हि॒ प॒श्य॒न्प॒श्य॒ति॒ स॒र्व॒मा॒प्नो॒ति॒ स॒र्व॒शः ॥६॥
चा॒क्षु॒षः स्व॒प्न॒चा॒री॒ च॒ सु॒प्तः सु॒प्ता॒त्प॒र॒श्च॒ यः ॥
भे॒दा॒श्चै॒ते॒ऽस्य॒ च॒त्वा॒र॒स्ते॒भ्य॒स्तु॒र्यं॒ म॒ह॒त्त॒र॒म् ॥७॥
त्रि॒ष्वे॒क॒पा॒च्च॒रे॒द् ब्र॒ह्म त्रि॒पा॒च्च॒र॒ति॒ चो॒त्त॒रे ॥
स॒त्या॒नृ॒तो॒प॒भो॒गा॒र्थो॒ द्वै॒ती॒भा॒वो॒ म॒हा॒त्म॒नः ॥८॥
इ॒ति॒ द्वै॒ती॒भा॒वो॒ म॒हा॒त्म॒न॒ऽइ॒ति॒ ॥११॥

इति मैत्रायणीयारण्यके सप्तमः प्रपाठकः ॥७॥

इति मैत्रायणीयमारण्यकं समाप्तम् ॥

पुरुषः चाक्षुषः यः अयं दक्षिणे अक्षिणि अवस्थितः ॥
इन्द्रः अयं अस्य जाया इयं सव्ये च अक्षिणि अवस्थिता
समागमः तयोः एव हृदयान्तर्गतः सुषौ ॥
तेजः तत् लोहितस्य अत्र पिण्डः एव उभयोः तयोः२
हृदयाद् आयती तावत् चक्षुषि अस्मिन् प्रतिष्ठिता ॥
सा अरणी सा तयोः नाडी द्वयोः एका द्विधा सती३
मनः कायाग्निं आहन्ति स प्रेरयति मारुतम् ॥
मारुतः तु उरसि चरन् मन्द्रं जनयति स्वरम् ॥४॥
खजाग्निसंयोगाद् हृदि संप्रयुक्तं अणोः हि अणुः
द्विरणुः कण्ठदेशे ॥ जिह्वाग्रदेशे त्र्यणुकं च विद्धि
विनिर्गतं मातृकं एवं आहुः ॥५॥
न पश्यन् मृत्युं पश्यति न रोगं न च दुःखताम् ।
सर्वं हि पश्यन् पश्यति सर्वं आप्नोति सर्वशः ॥६॥
चाक्षुषः स्वप्नचारी च सुप्तः सुप्तात् परः च यः ॥
भेदाः च एते अस्य चत्वारः तेभ्यः तुर्यं महत्तरम् ॥७
त्रिषु एकपात् चरेत् ब्रह्म त्रिपात् चरति च उत्तरे ॥
सत्यानृतोपभोगार्थः द्वैतीभावः महात्मनः ॥८॥

इति द्वैतीभावः महात्मनः इति ॥११॥

॥ इति मैत्रायणीये आरण्यके सप्तमः प्रपाठकः ॥७॥

॥ इति मैत्रायणीयमारण्यकं समाप्तम् ॥

अथ यजुर्वेदीये मैत्रायणीयारण्यके अन्ते पठ्यमाना—

शान्तिः ॥

॥ॐ॥ नमो वाचे नमो वाचस्पतये याऽर्चोदिताय च नोदिताय तस्मै वाचे नमो नमऽ-ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रविद्भ्यो मन्त्रपतिभ्यो मा मामृषयो मन्त्रकृतो मन्त्रविदः प्रादुर्दैवीᳲ वाचमुद्यासं जुष्टां देवेभ्यः स्वधावरीं पितृभ्योऽनुमतान्मनुष्येभ्यस्तन्मा देवाऽ-अवन्तु शोभायै पितरोऽनुमदन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ इति ॥

क्वचिदष्टोत्तरशतोपनिषदादौ चान्या शान्तिरुक्ता—

ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि, सर्वं ब्रह्मोपनिषदं माऽहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽअस्तु ॥ तदात्मनि निरते यऽउपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥१॥

ॐ शान्तिः शान्तिः शान्तिः ॥ इति ॥

अथ यजुर्वेदीये मैत्रायणीयारण्यके अन्ते पठ्यमाना—

॥ शान्तिः ॥

॥ ॐ ॥ नमः वाचे नमः वाचस्पतये या अर्चोदिताय च नोदिताय तस्मै वाचे नमः नमः ऋषिभ्यः मन्त्रकृद्भ्यः मन्त्र--विद्भ्यः मन्त्रविद्भ्यः मन्त्रपतिभ्यः मा मां ऋषयः मन्त्रकृतः मन्त्रविदः प्रादुः दैवीं वाचं उद्यासं जुष्टां देवेभ्यः स्वधावरीं पितृभ्यः अनुमतान् मनुष्येभ्यः तत् मा देवाः अवन्तु शोभायै पितरः अनुमदन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ इति ॥

क्वचित् अष्टोत्तरशतोपनिषदादौ च अन्या शान्तिः उक्ता।

ॐ आप्यायन्तु मम अङ्गानि वाक् प्राणः चक्षुः श्रोत्रं अथ बलं इन्द्रियाणि च सर्वाणि, सर्वं ब्रह्म–उपनिषदं मा अहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोद् अनिराकरणं अस्तु अनिराकरणं मे अस्तु। तद् आत्मनि निरते ये उपनिषत्सु धर्माः ते मयि सन्तु ते मयि सन्तु॥१॥

ॐ शान्तिः शान्तिः शान्तिः ॥ इति ॥